THE

KASHI SANSKRIT SERIES

(*HARIDAS SANSKRIT GRANTHAMALA*)

61

(Vedānta-S'uddhādvaita Section No. 1.)

THE

BRAHMAVĀDA SAṄGRAHA

and

SUDDHĀDVAITA PARIṢKĀRA 48

(*Philosophy of Śrī Vallabhāchārya*)

WITH COMMENTARIES AND HINDI TRANSLATIONS.

Edited and Translated

by

Pandit Harisankara Śastri

Vedānta Visārada.

PRINTED AND PUBLISHED BY

Jai Krishna Das Hari Das Gupta

The Chowkhamba Sanskrit Series Office,

Vidya Vilas Press, North of Gopal Mandir, Benares City.

1928.

Registered according to Act XXV. of 1867.

(*All Rights Reserved.*)

Printed-Published & sold by
JAI KRISHNADAS-HARIDAS GUPTA,
The Chowkhamba Sanskrit Series Office,
VIDYA VILAS PRESS,
North of Gopal Mandir,
BENARES CITY.

Printed by Jai Krishna Das Gupta
at the Vidya Vilas Press, Benares,

Agents:

1 Luzac & co, Booksellers,
LONDON

2 Otto Harrassowitz, Leipzig:
GERMANY.

3 The Oriental Book-supplying Agency,
POONA.

॥ श्रीः ॥

हरिदाससंस्कृतग्रन्थमालासमाख्य-
काशीसंस्कृतसीरिज्पुस्तकमालायाः
६२
वेदान्तशुद्धाद्वैतविभागे (१) प्रथमपुष्पम् ।

श्रीमदखण्डभूमण्डलाचार्यवर्यश्रीवल्लभाचार्यसम्मतो

ब्रह्मवादसङ्ग्रहः ।

शुद्धाद्वैतपरिष्कारश्च ।

विस्तृतभूमिकया विविधपरिशिष्टैर्भाषानुवादेन
टिप्पण्यादिना च समलङ्कृतः ।

ठक्कुरात्मजहरिशङ्करशास्त्रिवेदान्तविशारदेन शुद्धाद्वैतसम्प्रदाय-
पण्डितेन वैष्णववैभवस्य वैष्णवधर्मपताकायाश्च भूतपूर्व-
सम्पादकेन संशोधितः परिष्कृतश्च ।

प्रकाशकः-
जयकृष्णदास—हरिदासगुप्तः—
चौखम्बासंस्कृतसीरीजआफिस, विद्याविलास प्रेस.
गोपालमंदिर के उत्तरफाटक, बनारस सिटी ।

१९८५

हमारे यहां हर तरहकी छपाई व जिल्दसाजीका कार्य भी होता है।

हर तरह के संस्कृत ग्रन्थ तथा भाषा पुस्तकों के मिलने का पता—

जयकृष्णदास-हरिदास गुप्तः,

चौखम्बासंस्कृतसीरिज आफिस,

विद्याविलास प्रेस, गोपालमन्दिर लेन,

बनारस सिटी।

॥ श्रीकृष्णः ॥

अस्मिन् स्तबके ग्रन्थाः ।

सर्व प्रकारकी संस्कृत पुस्तकें मिलने का पता—

जयकृष्णदास-हरिदास गुप्ताः—

चौखम्बा संस्कृत सीरिज़ आफिस, विद्याविलास प्रेस,

गोपालमन्दिर के उत्तर फाटक, बनारस सिटी।

समर्पण

जिन्होंने आजीवन साम्प्रदायिक साहित्य की सेवा के द्वारा यह सिद्ध कर दिया कि श्रीमहाप्रभुजी की बिन्दुसृष्टि का कार्य भगवत्सेवा एवं आधिभौतिकसम्पत्ति की रक्षा करना तथा नादसृष्टि का कार्य अव्यभिचारिणी भक्ति में तन्मय रहते हुए लुप्तप्राय साहित्य की रक्षा एवं उद्धार करना है;

जिन्होंने अपने जीवन में आर्थिक एवं शारीरिक कष्ट सहन कर सुरसरस्वती के सेवकों के समीप एक उच्चतम आदर्श उपस्थित कर दिया;

जिन्होंने मेरे उत्साहका स्वागत कर मुझे सुरसरस्वती का अन्यतम सेवक बना दिया;

उन—

गोलोकवासी—

मित्रवर मूलचन्द्रभाई (तेलीवाला)

की पुनीत स्मृति में कृतज्ञता पूर्वक यह ग्रन्थ सादर समर्पित है।

हरिशङ्कर।

A FOREWORD

One of the many systems of religious thought in India that claim to be based on the authority of the *Upanishads*, is that of Vallabh-acharya, generally known as the *Shuddhādvaita Vedānta*, or *Shuddha-Brahma-Vāda*, in the religio-philosophical circles, and as *Pushtimārga*, as a sect of religion. Unfortunately, it is not so much known to a general reader as the *Advaita Vedānta* of Shankarāchârya, which, owing to the vast literature published on it in Sanskrit, English and Indian Vernaculars by its admirers who are quite large in number all over the world, is enjoying so much popularity that it is usally called the Vedânta Philosophy. The *Upanishads*, which all the systems of Vedantic Thought (Vedanta meaning here the *Upanidhads*), claim to interpret, present such a variety and multiplicity of ideas, that to incorporate all of them in a coherent system of philosophy is no less difficult than to interpret the actual world in a comprehensive, coherent and systematic way. As in actual philosophising on the nature of the world, there is a danger of some aspects of the world to be neglected and others to be over emphasised by philosophers impatient to give a finished system, so also has been the case with the interpreters of the *Upanishads*, who, unfortunately for philosophical genius in India, directed their keen and bright intellect to the ancient record's creative thought, instead of applying it to the actual world and life from which the sages of the Upanishads got their first-hand information. For an impartial investigator into the doctrines of the *Upanishads*, if he is to benifit by the attempts of the medieval thinkers, it is advisible to know all the interpretations offered by the various schools. The three books collected in this volume are welome as giving us the doctrines of one of the five well-known schools of *Upanishadic* thought, the school of Vallabha on which there is very much scarcity of published literature.

B. L. ATREYA M. A.

ASST. PROF. OF PHILOSOPHY, HINDU UNIVERSITY

BENARES.

॥ श्रीकृष्णाय नमः ॥

अथेदं किञ्चित्प्रस्तूयते ।

इह खलु सकलकलाकलापादिपीठे श्रीसरस्वत्योरेकत्रसङ्गत्वात्त्रिभुवनललामभूते भारते वर्षे वेदान्तविद्यापाथोदधिमन्थनेनाद्वैतविशिष्टाद्वैतद्वैताद्वैतशुद्धाद्वैताद्यपूर्वरत्नराशिभिरापूरितं सुरसरस्वतीसाहित्यभाण्डागार श्रीमच्छङ्कररामानुजमध्वनिम्बार्कवल्लभादिभिराचार्यवर्यैः। तत्र तावद्ब्रह्मवादापरपर्यायं शुद्धाद्वैतमतमेव श्रुतिसूत्रानुरोधित्वादेदीप्यते रत्नजातेषु, आलोकयति च स्वप्रभाभिः पुरुषपुङ्गवान् भागवतान् भक्तान् भगवदिच्छया भवान्तसम्भवान्दैवजीवान्। अत्रेदं विचार्यते किं तावच्छुद्धाद्वैतम्, कोऽर्थस्तस्य, किञ्च तल्लक्षणमिति ।

शुद्धाद्वैतमार्तण्डे गोस्वामिगोपालात्मजगिरिधराचार्यैः शुद्धाद्वैतपदस्यार्थः प्रतिपादितः कारिकाद्वयेन । तद्यथा—

"शुद्धाद्वैतपदे ज्ञेयः समासः कर्मधारयः ।
अद्वैत शुद्धयोः प्राहुः षष्ठीतत्पुरुषं बुधाः ॥
मायासम्बन्धरहितं शुद्धमित्युच्यते बुधैः ।
कार्यकारणरूपं हि शुद्धं ब्रह्म न मायिकम् ॥

शुद्धं च तद्द्वैतं शुद्धाद्वैतम्, शुद्धयोरद्वैत शुद्धाद्वैतमिति वा । शुद्धशब्दस्यार्थस्तु मायासम्बन्धरहितं ब्रह्मेति प्राहुः । तथा च मायासम्बन्धरहितस्य शुद्धस्यैव ब्रह्मणः कार्यकारणरूपेणांशांशित्वेन रूपेण वाऽद्वैतम् शुद्धाद्वैतपदवाच्यमिति विभावनीयम् । तल्लक्षणं तु—"इतरसम्बन्धानवच्छिन्नकार्यकारणादिरूपद्वित्वप्रकारकज्ञानप्रतियोगिताकाभाववत्त्वम् ।" तथाच सच्चिदानन्दलक्षण, जगत्कर्तृत्वादिलक्षणं वा "सत्यं ज्ञानमनन्तं ब्रह्म", "नित्य विज्ञानमानन्दं ब्रह्म" "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति"; "यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति"; "जन्माद्यस्य यतः शास्त्रयोनित्वात्", "अंशो नानाव्यपदेशात्", "ममैवांशो जीवलोके" इत्यादिश्रुतिसूत्रैः प्रतिपाद्यते शुद्धस्यैवानन्दमयस्य ब्रह्मणः कार्यकारणरूपेणांशांशित्वेन रूपेण वा जगद्ब्रह्मणोर्जीवब्रह्मणोरद्वैतम् । स्वीक्रियन्ते चात्र भगवन्निश्वसितरूपानिरपेक्षाः श्रुतयो, वेदान्तवाक्यग्रथनार्थत्वरूपाणि ब्रह्मसूत्राणि, श्रीकृष्णवाक्यानि, व्यासस्य समाधिभाषा चेति प्रमाणत्वेन सर्वैरप्यास्तिकैः । "**ब्रह्मवाद**" एवैतेषां श्रुतिसूत्रगीताभागवतात्मकप्रमाणमूर्धन्यानाम्प्रतिपाद्यो विषयः ।

भगवद्वदनवैश्वानरावतारापरपर्यायैः श्रीमद्वल्लभाधीश्वरैर्ब्रह्मसूत्राणुभाष्यसुबोधिनीनिबन्धषोडशग्रन्थादिषु सविस्तरं विचारितमेतत् । श्रीविठ्ठलनाथदीक्षितैर्विद्वन्मण्डने, श्रीपुरुषोत्तमैर्भाष्यप्रकाशेऽवतारवादावल्यां च, श्रीगिरिधरगोस्वामिभिः शुद्धाद्वैतमार्तण्डे, श्रीला-

लूभट्टैः प्रमेयरत्नार्णवे, श्रीगट्टूलालापरपर्यायैर्गोवर्धनैर्मारुतशक्तौ, श्रीमग्नलालशास्त्रिभिः पुष्टि-शिखरे, श्रीरमानाथशास्त्रिभिरपि शुद्धाद्वैतदर्शने ब्रह्मवादविषये बहुशो विचारितम्। ग्रन्थाश्चेमे शुद्धाद्वैतसिद्धान्तावबोधबद्धादराः पूर्वपूर्वप्रामाण्यप्राबल्यमावहन्ति । परं तेषु केषांचित् सकलोकबोधसौकर्यवैधुर्येण, केषाञ्चिदतिविस्तृतत्वात्, केषाञ्चिद्विषयविश्रृङ्खलत्वात्, केषाञ्चिदभिलषितकलावैकल्याच्च न सन्तोषमुपजनयन्ति मानसेषु प्रणयिनाम् । अनुपपत्तिसन्ततिमेतादृशीमपनयन्ति "ब्रह्मवाद" प्रणयनेन श्रीमद्गिरिवरधरणचरणपरिचरणमार्गमुकुलमार्तण्डायमानहरिदासवर्यश्रीमद्गोवर्धनगिरिवरतादात्म्यं प्राप्नुवन्तो गोस्वामिनो हरिरायचरणाः, मायावादकरीन्द्रदर्पविदलनदक्षाः कणभक्षाक्षपादपक्षपातिपदमनुसन्दधानाः श्रीव्रजरायचरणाः, शुद्धाद्वैतलक्षणपरिष्करणेन रामकृष्णभट्टाश्च । इयं हि ग्रन्थत्रयी त्रयीव सकललोकोपकारीणं त्रिवेणीव त्रिदुःखदुरितापहारिणी, तत्वजिज्ञासमानानामखिलानामपि जनानां स्पृहणीयतरेति नास्ति तत्र कस्यापि शङ्काकलङ्कानुभवः । प्रतिपाद्यो विषयस्तु **"ब्रह्मवाद"** इति नाम्नैवस्फुरति प्रेक्षावतां चेतसि घनगर्जितेन वृष्टिरिव ।

स एवायं श्रीपुरुषोत्तमास्यानलावतारोपदिष्टः सुरसृष्टिसमुद्भूतानां जीवानामुपकारको भक्तिमार्गः "पोषणं तदनुग्रहः" इति वाक्यानुरोधात्पुष्टिमार्ग इति गीयते साम्प्रदायिकैः । अयं च—

> "वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि ।
> समाधिभाषाव्यासस्य प्रमाणं तच्चतुष्टयम् ॥
> उत्तरं पूर्वसन्देहवारकं परिकीर्तितम् ।
> अविरूद्धन्तु यत्वस्य प्रमाणं तच्च नान्यथा ॥
> एतद्विरुद्धं यत्सर्वं न तन्मानं कथंचन ।"


इत्यादिप्रमाणनिकषग्राव्णा सम्यक् परीक्षित एव । अस्मिँश्च **ब्रह्मवादे** आनन्दमयो वेदैकप्रतिपाद्यः **श्रीकृष्ण** एवोपास्यत्वेन परिगृहीतः । तस्य निरतिशयानन्दत्वं वेदे प्रसिद्धमेव । अन्येषां देवानां तु गणितानन्दत्वं बृहदारण्यके प्रसिद्धम् ।

तद्यथा—

१०० मनुष्याणामानन्दाः			१ मनुष्यगन्धर्वाणामानन्दः
१०० मनुष्यगन्धर्वाणामानन्दाः	१००००	मानुषआनन्दाः	१ देवगन्धर्वाणामानन्दः
१०० देवगन्धर्वाणामानन्दाः	१००००००	,, ,,	१ पितॄणामानन्दः
१०० पितॄणामानन्दाः	१००००००००	,, ,,	१ आजानदेवानामानन्दः
१०० आजानदेवानामानन्दाः	१००००००००००	,, ,,	१ कर्मदेवानामानन्दः
१०० कर्मदेवानामानन्दाः	१००००००००००००	,, ,,	१ देवानामानन्दः
१०० देवानामानन्दाः	१००००००००००००००	,, ,,	१ इन्द्रस्यानन्दः
१०० इन्द्रस्यानन्दाः	१००००००००००००००००	,, ,,	१ बृहस्पतेरानन्दः
१०० बृहस्पतेरानन्दाः	१००००००००००००००००००		१ प्रजापतेरानन्दः

इतःपरं श्रुतयो निरतिशयानन्दत्वमगणितानन्दत्वं वा प्रतिपादयन्ति। अतः **श्रीकृष्ण-स्यैवानन्दमयत्वं** स्फुरति भक्तानां चेतसि ।

एतादृशोऽगणितानन्दः कोटिकन्दर्पलावण्ययुक्तो यशोदोत्सङ्गलालितः श्रीकृष्ण एव तदंशात्मकैर्जीवैरुपास्यते । "अधिकारप्रभेदेन फलभोक्तारो जीवा" इत्यपि सर्वजनसुविदितमेव। जीवानामधिकारभेदास्त्वधोलिखितक्रमेण विबोधयन्ति विपश्चितः ।



सर्वेऽपि भक्ताः स्वाधिकारानुसारतः फलं प्राप्नुवन्त्येव । तच्च फलं "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" इतिश्रुते रसात्मकपुरुषोत्तमेन सममेव सर्वकामोपभोगः। तत्साधनं तु भक्तिरेवेति विशदं व्याख्यातं तत्रभवद्भिर्हरिरायचरणैः । एवमंशांशित्वेन जीव-ब्रह्मणोरभेदः प्रतिपादितः ।

प्रपञ्चस्तु तत एवाविर्भूतः, कार्यरूपत्वाच्च तस्य ब्रह्माभिन्नत्वमेव । "जन्माद्यस्य यतः शास्त्रयोनि.वात्" "यतो वा इमानि भूतानि जायन्ते" "अहं सर्वस्य जगतः प्रभवः प्रलयस्तथा" "तदात्मानं स्वयमकुरुत" "पटवच्च" "नाभाव उपलब्धेः" "वैधर्म्याच्च न स्वप्नादिभ्यः" इत्यादिश्रुतिस्मृतिसूत्रैः सत्यत्वमेव प्रतिपाद्यते प्रपञ्चस्य । गोस्वामिश्रीव्रज-रायचरणैः प्रपञ्चस्य मायिकत्वं निपुणतया खण्डितमेव । एवं च प्रपञ्चस्यापि ब्रह्माभिन्नत्वम् । तदेवैतच्छुद्धाद्वैतम् ।

सन्त्यत्र ब्रह्मजीवजगद्विषये मायावादाद्यनेके मतभेदाः । समुपन्यस्यते ह्यत्रापि विपश्चितां विनोदाय शाङ्करामानुजीयमाध्वमततो वाल्लभमतस्य सालक्षण्यवैलक्षण्यसूचकं पत्रम् (Table):—

	श्रीमद्वल्लभाचार्याणां मतम् ।	**श्रीमच्छङ्कराचार्याणां मतम्**
१	शुद्धाद्वैतवादः	अद्वैतवादः
२	प्रमाणादि सर्वं सत्यं, केवलं ब्रह्मैव स्वेच्छावशात् प्रमाणादिरूपैर्विचित्रां लीलां करोति ।	प्रमाणादीनि व्यावहारिकाणि परमार्थतः सत्यं ब्रह्मैव ।

३	शब्द एव मुख्यं प्रमाणं तदनुकूलतयाऽन्येषां प्रामाण्यम्, किन्तु तत्सङ्ख्यानपेक्षिता। शब्दप्रमाणेऽप्यखण्डशुद्धाद्वैतज्ञानपर्यन्तं स्वतः प्रमाण वेदाः साङ्गाः, श्रीमद्भगवद्गीता, मीमांसाद्वयम्, श्रीमद्भागवतं (व्यासस्य समाधिभाषा) चेति प्रस्थानचतुष्टयम्।	प्रमाणानां व्यावहारिकीं सत्यताम्भ्युपेत्य तेषां प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धय इति षट्त्व मभ्युपगम्यते। (क) प्रस्थानत्रयं प्रमाणम्। (ख) शब्दप्रमाणस्यैव प्रमाणान्तरापेक्षया श्रैष्ठ्यम्।
४	"वेदोनारायणः साक्षादि"ति प्रामाण्यात्तस्य पारमार्थिकत्वम्।	जगदन्तः पातित्वाद्वेदानामपि न पारमार्थिकत्वम्।
५	प्रमेयं ब्रह्मैव।	प्रमेयं ब्रह्मैव।
६	सर्वधर्मविशिष्टत्वं ब्रह्मणः। सर्वधर्माणां च ब्रह्माभिन्नत्वं स्वाभाविकत्वं च, धर्मधर्मिणोऽविकृतरूपाः।	निर्गुणं निराकारं ब्रह्म।
७	आनन्दमयमेव ब्रह्म सैवपरा काष्ठा न ततः परं किञ्चिदस्तीति।	आनन्दमयो न ब्रह्म किन्तु ततः परं ब्रह्म अन्यदेव
८	सगुणनिर्गुणेतिकल्पना परापरेति विद्याद्वैविध्यं नाङ्गीक्रियते, ब्रह्मणो विरुद्धधर्माश्रयतया सर्वस्य सुसङ्गतत्वात्।	सगुणनिर्गुणेति कल्पना परापरेति विद्याद्वैविध्यं च स्वीक्रियते।
९	ब्रह्मैव स्वतोऽभिन्ननिमित्तोपादानकारणतया कर्तृ।	परमार्थतोऽकर्तृभूतं ब्रह्मैव मायावशात् कर्तृत्वेन प्रतीयते।
१०	जगतः सत्यत्वादभेदसम्भवः।	जगतोऽसत्यत्वाद्ब्रह्मणानन्यत्वं न सम्भवति।
११	सच्चिद्घनानन्दाद्ब्रह्मणोऽग्नेर्विस्फुलिङ्गवदंशात्मकजीवोत्पत्तिः। स च जीवो नित्यः।	अविद्यावशाद्ब्रह्मैव जीवरूपेण भासते
१२	तदविद्यानाशे तत्संसारनाशः नतु जीवनाशः।	विद्ययाऽविद्यानिवृत्तौ जीवत्वनाशः।
१३	जीवो ज्ञातृरूपो धर्मी च।	जीवश्चैतन्यज्ञानस्वरूपो नतु ज्ञातृरूपः
१४	आनन्दांशतिरोभावेन व्यापकोऽपि जीवोऽणुरूप एव पुनरानन्दांशप्रादुर्भावे व्यापकश्च।	जीवो विभुर्बुद्धिसंयोगादणुरूपेणभासते।
१५	ईशेच्छया जायमानं जीवस्यकर्तृत्वभोक्तृत्वादिकं पारमार्थिकम्।	जीवस्य कर्तृत्वभोक्तृत्वादिकं बुद्धिसम्बन्धजं न पारमार्थिकम्।
१६	विरुद्धधर्माश्रयतया जीवो ब्रह्मण अंशोऽगभेदासश्च।	जीवः प्रतिबिम्बभूत आभासः।
१७	ब्रह्मैव स्वेच्छावशादनेकजीवरूपाणि धारयित्वा विचित्रलीलाः करोति।	ब्रह्म माययानेकजीववद्भासते।

१८	अशांशिभावेनाभेदसिद्धिः	जहदजहल्लक्षणयाऽभेदसिद्धिः ।
१९	जगत् ब्रह्मण आधिभौतिकस्वरूपमतएव सत्यम् ।	जगदसत्यमविद्यया भासते च ।
२०	द्वैतज्ञानमविद्याकार्यम् ।	द्वैतज्ञानमविद्याकार्यम् ।
२१	जगद्भिन्नं संसारोभिन्नश्च । जगत् सत् भगवत्कार्यं भगवद्रूपं च । तस्य न नाशः । संसारस्तु आविद्याकार्यमसन् ज्ञाननाश्यश्च ।	जगत्संसारयोर्भेदोनाभिमतः ।
२२	अविकृतपरिणामवादः	विवर्तवादः ।
२३	आविर्भावतिरोभावौ ।	अध्यारोपापवादौ ।
२४	प्रकारभेदेनाख्यातिरन्यथाख्यातिश्च ।	अनिर्वचनीयख्यातिः ।
२५	भक्तिरन्या, उपासनाचान्या । कर्मोपासनाज्ञानानि भक्तेरङ्गानि ।	कर्म, उपासना, ज्ञानमिति साधनक्रमः । भक्त्युपासनयोर्भेदो नाभिमतः ।
२६	सर्वाणि साधनानि फलात्मकानि । ब्रह्मरूपाणि च ।	कर्मादीनि साधनानि जगदन्तःपातित्वादपारमार्थिकानि ।
२७	आत्यन्तिकदुःखनिवृत्तिपूर्वकपरमानन्दप्राप्तिरूपो मोक्षः ।	अविद्यानिवृत्तिरूपो मोक्षः ।
२८	मोक्षः प्रवेशात्मकसायुज्यमित्यभिधीयते ।	मोक्षः कैवल्यमित्यभिधीयते ।
२९	भावदिच्छाभगवल्लीलाद्यालम्बनेनाद्वैतं प्रतिपाद्यते ।	अविद्यामायाङ्गीकारेणाद्वैतं प्रतिपाद्यते ।
३०	एकमेवाद्वितीयं वस्तु स्वेच्छया तत्तद्रूपेण परिणमत इति मत्वाऽद्वैत साध्यते ।	सर्वमलीकमिति मत्वाऽद्वैतं साध्यते ।
३१	वेदस्याक्षर मप्यन्यथा न कल्पते । सर्वविरुद्धधर्माश्रयं ब्रह्मेति स्वीकारेण सर्वोऽपि श्रुत्यर्थो व्यवस्थाप्यते ।	तत्तच्छ्रुतिव्यवस्थार्थं निर्गुणसगुणोपजीव्यत्वोपास्यत्वपरब्रह्मत्वादिकल्पनम् ।

अथात्र रामानुजमततोवाल्लभमतवैलक्षण्यमुपन्यस्यते ।

	श्रीमद्वल्लभाचार्याणां मतम्	श्रीमद्रामानुजाचार्याणां मतम्
१	शुद्धाद्वैतम् ।	विशिष्टाद्वैतम् ।
२	चिदानन्दांशप्रादुर्भावे जडमपि ब्रह्मैव भवति तथाऽऽनन्दांशप्रादुर्भावे चिदपि ब्रह्मैव ।	जडस्य जडेनैवाभेदश्चितश्चिदैव ।
३	वेदानुकूलानि सर्वाणि प्रमाणानि तत्संख्यानियमो नास्ति ।	प्रमाणानां त्रयम्, तत्रागमस्य मुख्यत्वम् ।
४	ब्रह्मैव प्रमेयम् ।	ब्रह्मैव प्रमेयम् । परन्तु ब्रह्मणः चिदचिद्रूपे शरीरे तयोः परिणामं चाभ्युपगम्यते ।

५	विरुद्धधर्माश्रय ब्रह्म । सर्वदिव्यधर्मवदपि ।	सर्वदिव्यधर्मवद्ब्रह्म ।
६	ब्रह्मणः कर्तृत्वम् ।	ब्रह्मणः कर्तृत्वम् ।
७	अविकृतपरिणामवादः ।	ब्रह्मशरीरं परिणमते ।
८	जीवोऽणुरूपो व्यापकश्चानन्दाविर्भावे ।	जीवोणुर्नित्यः कर्तृरूपश्च ।
९	ब्रह्मैव नानारूपाणिस्वेच्छया धारयतीति, अविर्भावतिरोभाववादस्वीकारात् ।	सर्वदैवजीवानां नानात्वम् ।
१०	जगत्संसारयोर्भेदः ।	जगत्संसारयोर्भेदो नास्ति ।
११	भक्त्युपासनयोर्भेदः ।	नास्ति भक्त्युपासनयोर्भेदः ।
१२	अविद्वद्दृशायामन्यथाख्यातिः पूर्णज्ञानिदृष्ट्याऽख्यातिश्च ।	सत्ख्यातिः ।

माध्वमततो वाल्लभस्य वैलक्षण्यम् ।

	श्रीवाल्लभमतम् ।	श्रीमाध्वमतम् ।
१	शुद्धाद्वैतम् ।	द्वैतम् ।
२	वेदानुकूल सर्वप्रमाणं तत्सङ्ख्यानास्ति ।	प्रत्यक्षानुमानशब्दात प्रमाणत्रयम् ।
३	ब्रह्मैव प्रमेयम् ।	ब्रह्मणः प्रमेयत्वेऽपि जीवो जगदिति पृथक्त्वद्वयम् ।
४	ब्रह्मजीवजगतां सर्वथैवाभेदः ।	ब्रह्मजीवजगतां कदापि नास्त्यभेदः।
५	ब्रह्म सधर्मकं निर्धर्मकं चेत्युभयविधम् ।	ब्रह्म सर्वदा सधर्मकमेव ।
६	ब्रह्मणि विरुद्धधर्माश्रयता वर्तते ।	न विरुद्धमाश्रयत्वं ब्रह्मणः ।
७	ब्रह्मैवाभिन्ननिमित्तोपादानकारणम् ।	ब्रह्मनिमित्तकारणम् । प्रकृतिश्चापादानकारणम् ।
८	अखण्डाऽद्वैतम् ।	अनन्यत्वं नास्ति ।
९	आध्यात्मिकमक्षरब्रह्मस्वरूपम् ।	न तथाऽभिप्रेतम् ।
१०	जीवो ब्रह्मण एवेच्छागृहीतं रूपम् ।	जीवः पृथक्तत्वम् ।
११	जीवस्य नित्यत्व ज्ञातृत्वंच ।	तथैवात्रापि ।
१२	अखण्डरूपस्यापि तस्यानन्दांशप्रादुर्भावे व्यापकत्वम् ।	जीवः सर्वदाऽणुरूपः ।
१३	जीवस्य कर्तृत्वभोक्तृत्वे वर्तेते ।	तथैवात्रापि ।
१४	इच्छाविपरिणामवत्त्वं जीवस्य ।	नानात्वं पारमार्थिकत्वं च ।
१५	अंशत्वादेर्वांशांशित्वेन जीवस्य ब्रह्मणा सहाभेदः ।	यद्यपि जीवस्यांशत्वमुरीक्रियते, तथापि तस्मादेवांशत्वरूपकारणात्तस्य ब्रह्मणः सकाशाद्भेदः ।

१ नेन द्वैतस्वीकारात् वैषम्यनैर्घृण्यपरिहारोदुष्करः । श्रीमद्वल्लभानां मते तु अखण्डाद्वैतस्वीकारात् सुलभः ।

१६ जगत्संसारयोर्भेदः।	जगत्संसारयोर्भेदो नाभिमतः।
१७ भक्त्युपासनयोर्भेदः।	नाभिमतो भक्त्युपासनयोर्भेदः।
१८ आबद्धदशायामन्यथाख्यातिः। पूर्णज्ञानिदृष्ट्याऽख्यातिश्च।	अन्यथाख्यातिः।

तदेव प्रदर्शित सङ्क्षेपतो मतवैचित्र्यम्।

सत्स्वपि मतान्तरेषु श्रीमद्वल्लभाचार्यचरणानां शुद्धाद्वैताखण्डब्रह्मवादस्यैव सर्वश्रुतिप्रतिपादितत्वात्सूत्रकारसम्मतत्वाच्च समीचीनत्वमितिनास्त्यत्र विदुषां विवादपदलेशोऽपि।

हन्त! खिद्यते चेतः, यत्साम्प्रतप्राचीनपारिपाटिमनुसृत्याध्यापनशीलानां सङ्ख्यावतां कोऽपत्रपद्धतिमनुसरण एव प्रीतिर्दृश्यते, न पुनर्मूलग्रन्थाभिप्रायप्रकाशने। सुदूरतरमेवास्तु ग्रन्थाभिप्रायप्रदर्शनम् ग्रन्थकृत्जिज्ञासापि नाकुलयति विपश्चितां चेतांसि। ये पुनस्तादृशीं परिपाटिमनुसरन्ते तेषां तु श्रीवल्लभाधीश्वरमतमेव बादरायणाभिप्रेतमित्यभिप्रायः।

श्रीमतां प्रोफेसर *M. G. Shastri* महोदयानां मते शङ्कराचार्याणां मायावादस्तु सर्वथैवासमीचीनः। वदन्ति च ते—"*This would show that Shankar's Mayavada is a jumbled outcome of the Samkhya and Buddhist tenets, blended with misinterpretation of the passages referring to the creation of the dreaming soul on the lines of Gaudpada. The Sankhyas therefore stand superiar to Shankar in holding that the universe is a real entity and that it must in consequence have a real cause.*"

साङ्ख्यमतानुयायिनो विकृतपरिणामवादमनुसृत्य जगत्स्वरूपमङ्गीकुर्वन्ति, श्रीवल्लभास्तु "अविकृतपरिणामवाद" मेवाभ्युपगम्य जगत्सत्यत्वसाधने प्रवृत्ताः। यद्यपि साङ्ख्यमतानुसरणं न सर्वथैव दोषरहितम्, तथापि सांख्यानां परिणामवादस्तु शङ्कराणां विवर्तवादतोऽधिकमेव विश्वासमुत्पादयति प्रेक्षावताम्।

डा० थीबो (*Thebout*) महाशयानां मतेऽपि शङ्कराणां मायावादः सर्वथैवानादरणीयः।

डा० भाण्डारकराणामपि मते शाङ्कराणां मायावादव्याख्यानं नैव प्रमोदास्पदम्। "*The opinion expressed by some eminent scholars that the burden of the Upanishad teaching is the illusive character of the world and the reality of the one soul only, is manifestly wrong, and I may even say, is indicative of an uncritical judgment.*"

यद्यपि *Gaugh* महाशयः शाङ्करसरणिमेव स्तौति, तथापि तन्मतं न सर्वजनविश्वासमुत्पादयति। *Colonel Gacob* महाशयः शाङ्करमतस्तावकं *Gaugh* महाश-मुत्तर-

यति—*The writers of the older Upanishadas i. e. The Vedantists of the older school were undoubtedly Parinamvadis, or believers in the reality of the world of perception, and with them Brahma was not its substrate or illusory material cause, but the material from wich the universe was evoled as the web of a spider etc."*

यद्यपि वेदान्तपाथोदधिमथनप्रवृत्तानामनेकेषां विदुषां मतान्तराणि समुपलभ्यन्ते, तथापि श्रीमद्वल्लभाचार्याणां ब्रह्मवाद एव निर्दुष्टां पदवीमावहतीति भाण्डारकराणा मतमस्ति। "*Thus most of these schools avoid the Pantheism of Spinoza, and the incompatibility between God's development into the world and his transcendency by holding that the rudiments of the material and spiritual world associated with God as his characteristics or as his body or as his power, only undergo development, he himself remaining pure. Vishnuswamin and Vallabha, admitting as they do, the development of Purushottam into the world and at the same time his transeendency, follow Badarayan."*

वेदश्रद्धा

अखण्डशुद्धाद्वैतभक्तिमार्गप्रवर्तकानां श्रीमद्वल्लभाधीश्वराणां तदनुयायिनां च वेदविषये निरतिशया श्रद्धा वर्तते। वेदस्याक्षरमात्रमप्यन्यथार्थकमर्थवादार्थकं वा नाङ्गीकुर्वन्ति श्रीवल्लभाचार्याः। वदन्ति च "वेदश्च परमाप्तोऽक्षरमात्रमप्यन्यथा न वदति। अन्यथा सर्वत्रैव तदविश्वासप्रसङ्गात्।" "वेदेऽक्षरमात्रमन्यथा कल्पनेऽपि दोषः स्यात्" "तस्माद्वेदेऽक्षरमात्रस्याप्यसत्यार्थज्ञानस्याभावाद्वैदिकानां न सन्देहः" इत्यादि। तेन सर्वथैवायं सिद्धान्तो वेदैकसम्मत इति नास्ति कस्यापि विपश्चितो विप्रतिपत्तिः।

ग्रन्थकारपरिचयः।

श्रीहरिरायचरणाः

श्रीमद्वल्लभाधीश्वराणां द्वितीयकुमाराणां गोस्वामिश्रीविट्ठलनाथानां प्रपौत्राः श्रीहरिरायचरणाः संवत् १६४७ वत्सरे प्रादुरभूवन्। त एव ब्रह्मवादप्रणेतारः। एतेषां निखिलमपि विद्याध्ययनं श्रीविट्ठलेश्वराणां चतुर्थसूनुश्रीगोकुलनाथानां सविधे सञ्जातमिति प्राचीनानां मतम्। श्रीमद्धरिरायचरणा विद्वत्प्रकाण्डा आसन्निति अत्र नास्ति कस्यापि विदुषो वैमत्यम्। विद्वन्मौलिमणयोऽप्येते स्वात्मनं हरिदासत्वेनैव मन्यन्तेस्म। समुपलभ्यन्ते 'हरिदास' विरचिताः शतशो ग्रन्थाः। श्रीहरिरायप्रणीतानां ग्रन्थानां सङ्ख्यानं तु न केनापि कर्तुं शक्यते। अत्रैव गोपालमन्दिरे, नाथद्वारे, काम्यवने, पं० श्रीगट्टूलालपुस्तकालये च दृष्टि-

पथमयाता बहवो ग्रन्थाः । दर्शनपथमगतानां ग्रन्थानां नामान्यप्यत्रस्थानसौकर्यवैधुर्येण प्रकाशयितुं न शक्यते, ग्रन्थविभागं कृत्वैव शक्नोम्यवस्थातुं सतां पुरतः । केचन ब्रह्मवाद-भक्तिरसवादादयो 'वादा'न्ता ग्रन्थाः । अन्ये मुक्तिद्वैविध्यनिरूपणादयो 'निरूपणा'न्ताः । अपरे मार्गस्वरूपनिर्णयादयो 'निर्णया'न्ताः । इतरे भक्तिमार्गे पुरुषोत्तमत्वनिश्चयादयो 'निश्चया'न्ताः । केचन मूलस्वरूपनिराकरणादयो 'निराकरणा'न्ताः । एवमेव रहस्य—तात्पर्य—विवेक—विवेचन—विवृति—विवरण—लक्षण—अनुकरण—वर्णन—विध्यन्ता बहवो ग्रन्थाः समुपलभ्यन्ते । एतदतिरिक्ता अष्टकानि स्तोत्राणि च विद्यन्ते । परं तेषु सर्वेष्वपि स्वप्रभु-विज्ञप्तिः, स्वामिनीविज्ञप्तिः, यमुनाविज्ञप्तिः, वल्लभविज्ञप्तिरित्यादिविज्ञप्तिग्रन्थाः, शिक्षापत्राणि च भक्तिरसमहोदधौरत्नरूपाण्येव समुल्लसन्ति ग्रन्थरत्नानीमानि महार्हाणि । तथापि तन्मुद्रणे न कस्यापिप्रवृत्तिः । अधुनातु कटुकाटिपटलदंशनेनवा पाथसपृषतपातेनवा निलया-गीलकीलकवलनेन वा विलोपः क्रमादवलोक्यते ।

एते सङ्गीतसागरविलोडनदक्षा अप्यासन् । गीतगोविन्दसरणिमनुसृत्य भूरि भक्तिभाभूषितानामष्टपदीनामपि प्रणयनं चक्रुः । तथैव व्रजभाषायामपि कमनीयं कीर्तनकदम्बं कृतवन्तः । कीर्तनानि च तानि प्रत्यह सर्वत्र मन्दिरेषु भगवत्सन्निधौ गीयन्त इति नाविदितं भगवदीयानाम् ।

श्रीहरिरायचरणास्तु विनयस्य परमामवधिं प्राप्नुवन्त इत्यपि तद्ग्रन्थपरिशीलनेन पारम्परिकं परिज्ञान सम्भवत्येव । पूज्यपादानामेतेषां प्रादुर्भावो यद्यपि महामहिमशालिनि वल्लभवंश एव, यद्यपि तेभ्यो महार्हवस्त्राभरणानि छत्रचामरादीनि च राजचिह्नान्यपीदानींतनतद्वंश्यानामिव सुतरां सुलभान्यासन्, यद्यप्येते ख्यातवैदुष्याः पण्डितप्रकाण्डा आसन्, तथापि स्वात्मानं जीवत्वादल्पज्ञं सर्वदोषदुष्टं च मन्यमानाः श्रीकृष्णमेवं विज्ञापयन्तिस्म । तद्यथा—

दीननाथ न वै दैन्यमितोऽधिकमिहास्ति हि ।

*　*　*　*

जीवस्वभावदोषेण वयं यद्यपि न स्थिराः ।
तथाप्यङ्गीकृतिस्थैर्यं निजं नाथ विचारय ॥

*　*　*　*

सर्वज्ञत्वात्त्वया ज्ञातं पुरा दुष्टा इति स्वतः ।
स्वचार्यवंशसम्बन्ध स्त्विदानीमपि वर्तते ॥
दुष्टा अपि निजा नैव त्यज्यन्ते दोषनाशकैः ॥

R 6893 N28

SANSKRIT VIDYA PEETHA KENDRIYA LIBRARY T.RUPATI.

अन्यत्राप्युक्तं तैरेव—

"हौं वारौं इन भगवदीयनपर,
मेरे तनको करौं बिछौना, सीस धरौं इनके चरणन पर"

इयमेव विनयस्य परा कष्ठेति निर्विवादमेव । नैवाधुना तद्वंशीय एकोऽपि गोस्वामी, पुरोदीरित गुणगरिष्ठः प्रभुवरचरणपरिचरणपरायणान्तःकरणः सन् स्वात्मानं सर्वं दोषदुष्टं मन्यमानो, वैष्णवानां चरणेषु स्वशिरःपातनेन कृतकृत्यो भवितुं सम्भावयन् चाक्षुष-प्रत्यक्षतामुपगतः, न वा तादृशः कोऽपि भागवतो भक्तः। श्रीहरिरायचरणैस्तुजन्मनः साफल्यं श्रीवल्लभाधीशाश्रयेण, सुबोधिनीदर्शनेन (मननेन) राधिकानाथाराधनेन, हरिनामग्रहणादिन च निरूपितम् । एते हि १२० वर्षाणियावत् भूतलमलञ्चक्रुः ।

मुद्रितश्चात्र ग्रन्थे कारिकात्मकोऽपरोऽपि ब्रह्मवादः । तस्यापि प्रणेतारः श्रीहरि-रायचरणा एव । एतद्व्याख्यानं दीपिकासमभिधानं मुद्रणावसरे नास्माभिर्लब्धम् । तच्च भगवच्छास्त्रनिष्ठातशास्त्रिश्रीमभलालमहाभामानामनुकम्पया सम्प्राप्तमिदानीम्, अतस्तत्-सन्निवेशः (क) परिशिष्टे कृतः ।

श्रीव्रजनाथगोस्वामिनः ।

गोस्वामिश्रीव्रजनाथविरचितो "ब्रह्मवादो"पि मुद्रित एवात्र । एते हि गोस्वामिनः श्री रघुनाथतनयाः श्रीमद्वल्लभाधीश्वरेभ्योऽष्टमीं परम्परां प्राप्नुवन्तः। श्रीविट्ठलनाथानां प्रथमतन-यवश्याः । एतेषां प्राकट्यं वैक्रमीये अष्टादशशतके (१७२९) सञ्जातमित्यैतिहासिकाः प्राहुः । विद्वत्प्रकाण्डानां श्रीकृष्णाचन्द्राणां श्रीमत्पुरुषोत्तमानां श्रीकाकावल्लभानां, च समानका-लिका ह्येते बभूवुः । षोडशग्रन्थादिष्वप्येतेषां टीकाः समुपलभ्यन्ते । श्रीतेलीवाला-मूलचन्द्रमहाशयाः प्राहुरिमे षोडशग्रन्थानां टीका विलिख्य संशोधनार्थं श्रीकाका-वल्लभानां सविधे प्रेषयांचक्रुः । श्रीकाकावल्लभजीसंशोधिताष्टीकास्तत्रात्रैव प्रसिद्धिं गताः । अथच श्रीकाकावल्लभजीसंशोधनविहीनाष्टीकाः श्रीव्रजराजनाम्ना प्रथिता इति । अस्मत्सविधे श्रीमत्पुरुषोत्तमसमानकालिकानां सङ्ख्यागतां नामावलिः, तात्कालिकानां ग्रन्थानां सूचीपत्रमपि विद्यते । प्रहस्तवादोदाहारे तद्विषयको भूयान् विचारः समुप-निबद्धोऽस्माभिरतो नात्र पिष्टपेषणं क्रियते ।

श्रीरामकृष्णभट्टाः ।

शुद्धाद्वैतपरिष्कारप्रणेतारः श्रीरामकृष्णभट्टास्तु काश्यामेव श्रीगिरिधरगोस्वामिनामन्ते-वासिन आसन् । एतेषां जन्मभूर्मध्यप्रदेशे सागर नगरी (*Saugor C. P.*) आसीत् । यदा श्रीगिरिधरचरणाः श्रीनाथद्वारतो गुरुदक्षिणारूपेणेदानीमत्र विराजमानं श्रीमुकुन्दराय-स्वरूपमत्रानीतवन्तस्तदानीं मार्गं एवैतेषां समागमो बभूव । १८८३ तमे विक्रमाब्दे का-शीवासः कृतः । एतेषामेव पौत्ररत्नम् शुद्धाद्वैतवेदान्तग्रन्थरत्नपरीक्षको रत्नगोपालभट्टः । श्रीरामकृष्णभट्टानां शुद्धाद्वैतमार्तण्डप्रकाशः, श्रुतिरहस्यप्रकाशादयश्च कृतय उपलभ्यन्ते । एतेषां समानकालिकाः श्रीद्वारकेशगोस्वामिनः, योगीश्रीगोपेश्वराः, श्रीगिरिधराः, श्रीदामो-दरादयः साम्प्रदायिका आचार्याः श्रीराजारामशास्त्री, काशीनाथशास्त्री, काकारामपण्डितजी गौडस्वामी–विभवरामशास्त्री–सखारामपण्डिताश्चासन् । काश्यां बहुवारं श्रीरामकृष्णभट्टानां

पूर्वोक्तपण्डितैः सह शास्त्रार्थोऽभूत् । प्रतिपादितं च भट्टमहाशयैः शुद्धाद्वैतमतम् । जयपुरे, दतियाराज्ये, रीवाँ राज्ये च तत्तन्नरेन्द्राश्रितैः पण्डितप्रवरैः सहापि शास्त्रार्थोऽभूत् । विजयपत्राणि तेषां सन्त्यस्मत्सविधे ।

टीकाकारपरिचयः ।

श्रीगोपालकृष्णभट्टः ।

श्रीहरिरायप्रणीतब्रह्मवादविवरणं गोष्ठीशालोपनामकहरिकृष्णात्मजगोपालकृष्णेन श्रीगोपेश्वरशिष्येण सुकविना कृतम्। श्रीगोपेश्वरचरणास्तु वैक्रमीय एकोनविंशतिशतके भूतलमलञ्चक्रुः । श्रीगोपेश्वराणां पाण्डित्यं प्रतिभां च भक्तिमार्तण्डादिदर्शनेन साक्षात्कुर्वन्ति भाग्यवन्तो भागवताभक्ताः ।

श्रीरघुनाथशास्त्री ।

शुद्धाद्वैतपरिष्कारतात्पर्यप्रणेतारो महाराष्ट्रदेशोद्भवा वैराजक्षेत्रकृताध्ययना ब्रह्मचारिनारायणशास्त्रिमहाभागानामन्तेवासिनः 'कोकजे' इत्युपाह्वा गोपालात्मजा रघुनाथशास्त्रिणः सन्ति । अस्मत्सतीर्थास्तर्कतीर्थाश्चैते विपश्चितः ।

ग्रन्थ संशोधनम् ।

ब्रह्मवादकारिकाया एकमेव पुस्तकं समुपलब्धं विद्याविलासमुद्रणागारतः । तदनुसारेणैव मुद्रणकार्यं संवृत्तमत्र । मोहमय्यां पं० गट्टूलालसंस्थायां दृष्टपूर्वोऽयं ग्रन्थः ।

श्रीहरिरायविरचितस्य ब्रह्मवादस्यैकं पुस्तकं वर्षत्रयात्पूर्वमेवात्र गोपालमन्दिरे दृष्टम् । तदनुसारेणैतत्संशोध्य गोलोकवासिनां तेलीवालामूलचन्द्रमहाभगानामादेशेन यदाऽहं मोहमयीं गतस्तदा तदीयपुस्तकत्रयेण पं० गट्टूलालसंस्थायाः पुस्तकद्वयेन चास्य संशोधनकार्यं समाप्तिमगमत्।

श्रीव्रजरायचरणानां ब्रह्मवादस्तु वादावल्यां पं० भट्टश्रीरमानाथशास्त्रिभिर्मुद्रापित एव । परन्तु तस्य तत्र सर्वथैवाशुद्धरूपेण मुद्रितत्वात् सम्प्राप्तः पुनर्मुद्रणावसरः । अस्य संशोधनं तु यदाऽहं काम्यवन आसम्, तदैव पं० मुन्नीलालमहाशयानां साहाय्येन सञ्जातम् । तत्रैव पुस्तकत्रयं समुपलब्धम् । पुस्तकद्वयं विद्याविलासमुद्रागारतः प्राप्तम् । तत्तत्स्थलेषु टिप्पण्यादिना परिष्कृत्यैव मुद्रापितोऽयं ग्रन्थः ।

शुद्धाद्वैतपरिष्कारस्यैकं हस्तलिखितं पुस्तकं विद्याविलासमुद्रणागारत एव सम्प्राप्तम् । तदनुसारेणैव तन्मुद्रणमत्रापि । वर्षत्रयात्प्रागेव विद्याविलासमुद्रणागाराध्यक्षैः श्रेष्ठिवरश्रीजयकृष्णदासमहाशयैरसकृत् समुत्साहितोऽहमस्य मुद्रणार्थम् । परन्तु भगवदिच्छाधीनत्वाज्जीवस्य न तत्कार्यं तदानीं परिपूर्णमभूत् ।

उपकारस्मरणम् ।

गोलोकवासिनो मूलचन्द्रमहाशयस्यास्मन्मित्रस्य, शुद्धाद्वैतसम्पादकस्य तत्रभवतो वसन्तरामशास्त्रिणः, काम्यवनपुस्तकालयाध्यक्षस्य पं० मुन्नीलालमहोदयस्य चात्रोपकारः स्मर्तव्य एव। यद्येतेषां महानुभावानामनुकम्पा न स्यात् तदैतद्ग्रन्थमुद्रणमप्यसम्भवत्वपदवीमापद्येत ।

तत्रभवद्भिर्भगवच्छास्त्रनिष्णातश्रीमिग्गनलालशास्त्रिभिः श्रीहरिरायविरचितब्रह्मवाद-दीपिकां प्रदाय बहूपकृतम् ।

श्रीरघुनाथशास्त्रिणां तु विशेषत एवोपकारः स्मर्तव्यः । ग्रन्थसंशोधनादि (*Proof-reading*) निखिलप्येतेषां साहाय्येनैव संवृत्तम् ।

श्रीमद्भिर्दर्शन शास्त्राध्यापकैः (*Prof. of Philosophy*) आत्रेयमहाभागैरपि प्राक्कथनं (*Foreword*) लिखित्वा बहूपकृतम् ।

तथैव विद्याविलासमुद्रणालयाध्यक्षस्य श्रेष्ठिजयकृष्णदासस्याप्युपकारः स्मर्तव्य एव ।

क्षमाभ्यर्थनम् ।

ग्रन्थेऽत्राक्षरसंयोजकदोषात्संशोधकस्य जीवसुलभदोषवत्वाच्चाशुद्धिदोषो नयनपथमागत श्चेद्विद्वद्भिरवश्यमेव क्षन्तव्यमिति प्रार्थयति—

हिन्दूविश्वविद्यालयः, काशी ।
फाल्गुनशुक्ल ५ रवौ १९८४,

विदुषां किङ्करो
हरिशङ्करः

॥ श्रीकृष्णाय नमः ॥

गोलोकवासी श्रीयुत मूलचन्द्र तुलसीदास, तेलीवाला, बी. ए. एल एल. बी. का संक्षिप्त जीवन चरित्र।

१८८७ के २३ सितम्बर को महामान्य श्रीयुत मूलचन्द्र जीने भरोचमें, जो नर्मदानदी के दक्षिणतट पर स्थितहै, जन्म लिया। यह स्थान वही है, जहां बलिराजाने दशाश्वमेध यज्ञ किया था और भगवान् वामनको त्रिपाद भूमि दान दिया था। पुराने समयसे भार्गव जैसे कर्मकाण्डी ब्राम्हणों का यह निवास स्थान रहाहै। विसामोढ वैश्य कुलमें मूलचन्द्रजीने जन्म लिया था। यह जाति छोटी होनेके कारण आपके पितामह सेठ लालभाई का ५५ वर्ष तक विवाह नहीं हुआ था। आपके पितामह जब श्रीनाथद्वार और कांकरोली की यात्रा करने गयेथे, तब कांकरोलीमें गोस्वामी श्रीपुरुषोत्तमजीने उन को ऐसा वरदान दिया था कि तुमको दो लडके होंगे। तब उन्हों ने प्रत्युत्तर दिया कि मैं अविवाहितबद्ध और अब विवाह होनेकी आशा भी नहीं है। तब श्रीपुरुषोतमजीने मुसकुराके कहा कि घर जाईये, सब कुछ होजायगा घर आने पर उनका विवाह हुआ। और वरदानके अनुसार दो लडके हुए। उन के कुटुम्बका ऐश्वर्यभी खूब बढा, लेकिन मूलचन्द्रजीके जन्मके पहले आकस्मिक कारणों से बहुत धन हानि हुई। बाल्यावस्थामें इनके स्वास्थ्यकी रक्षा न होसकी। मूलचन्द्रजी शरीरसे दुर्बल थे, मगर इस दुर्बल शरीरमे ऐसी विचित्र शक्ति थी—जिसके लिये भय कुछ भी नही था, जो आपत्तियों से तनिकभी डगमगाती नहीं थी बहारी दिखावसे जिसे कोई भी धोखेमें नहीं डा सकताथा और जिसके लिये धन तृणवत् था। मूलचन्द्रजी बालपनमें खेल कूदके बडे प्रेमी थे, मगर अपनी कक्षा मे सब लडकोंमे श्रेष्ठ थे। आपकी धारणा शक्ति इतनी तीक्ष्ण थी कि एक बार पढने से आपके ध्यानमें ज्यों का त्यों सब रहता था, आपके शिक्षक आप पर बहुत प्रेम करतेथे। आनन्दी और मिलन सार स्वभाव होने से आपके आदेशों को, जो आप मानीटर की हैसियत में करते थे, कक्षा के बादमाश से बदमाश और मजबूत से मजबूत लडके भी खुशीसे मानते थे। कालेजके महाराष्ट्रिय मित्रों के सहवास से मूलचन्द्रजी को गायन का भी ज्ञान होगया

था। वेदान्त लेकर आपने १९०९ में बी. ए. की परीक्षा पास की। इस के बाद एलफिन्स्टन स्कूल बम्बई में आप अध्यापक की नौकरी करने लगे। इस के कुछदिन बाद ट्रेनिंग कालेज में अभ्यास करने के लिये आप को चुना गया और ५० मुद्रा छात्रवृत्ति आपको मिलने लगी। इस से कानून का अभ्यास करने के लिये आप को बहुत सहूलियत हुई। पुष्टिभक्तिसुधा मासिक में मूलचन्द्रजी अपने निर्भीक और स्वतन्त्र विचारों से परिपूर्ण लेख प्रकाशित करातेथे। इसी कारण वैष्णव सम्प्रदायमे हलचलसी उत्पन्न होगई थी।

वैष्णव परिषद् तथा पुष्टिभक्तिसुधा मासिकके जनक भगवच्छास्त्रनिष्णात श्रीयुत मगनलाल गणपतराम शास्त्रीजी के साथआप ने काम किया और १९१० में सूरत में वैष्णवपरिषद् का अधिवशन हुआ था उस में जो आपने कार्य किया उस के कारण लोगों में आप के सम्बन्ध में भारी प्रेम उत्पन्न हुआ।

१९१४ में आप एल्, एल् बी. की परीक्षा में पास हुए। और यही मालूम होताथा कि आप सम्भवतः भरोच में प्रेक्टिस करेंगे। मगर लोगों को बडाही आश्चर्य हुआ जब आप बम्बई में वास करने के लिये आये। बम्बई में रहने का जो निश्चय आपने किया था उस का कारण योंथा—

छुटपन में आप को ऐसे ऐसे स्वप्न दिखाई पडते थे जिन में से कुछ में आपको मालूम होता था कि हम हवा में उड रहे हैं, और कुछ आप के भविष्य को सूचित करते थे। जैसे भरोच के मन्दिर में श्रीनाथजी पालने में झुलाए जाते है वैसे आपने एक दिन स्वप्न में देखा, श्रीनाथ जी हंसते हुए भी आप को मालूम पडे थे। प्रातः काल में उठे और नित्यकर्म से निवृत्त होकर दर्शन के लिये मन्दिर में गये। जैसा दर्शन आपको स्वप्न में हुआ था ठीक वैसा दर्शन होनेसे आप को बहुत खुशी हुई। जब आप दर्शन कर लौट रहे थे तब तेलीवाला कुटुम्ब के परम मित्र श्रीयुत जयकृष्णदासजी ने आप को दूकान पर बुलाया और एल एल बी की परीक्षा में उत्तीर्णहोने के उपलक्ष्य में आप को बधाई देकर प्रैकटिस बम्बई हाईकोर्ट में करने के लिये कहा और वकीलीकी सनद लेनेके लिये ५०० मुद्रा प्रदान किया इस घटना का आधार ईश्वर इच्छा जान कर मूलचन्द्रजीने तुरन्त बम्बई के लिये प्रस्थान किया और वहां प्रैक्टिस करने लगे। श्रीयुत भाईलाल कोठारी के भवनमें आप रहते थे। यहां प्रं. गट्टूलालाजीकी संस्था

के मन्त्री श्रीयुत काशीदास नारायणदास दलाल से आप की मुलाकात हुई। वार्षिक व्रतोत्सव टिप्पणी बनानेमें आपने श्रीयुत दलाल को मदत की और इसी कारण आप उन के प्रेमभाजन हुए। विद्वत्ता और गाढज्ञान को देख आप को पुस्तकालय के हस्तलेखों को देखने की सुविधा दी गई, और बाद आप संस्था के ट्रस्टी भी बनाये गये। आप का जन्म तथा बम्बई में रहने की सूचना और हस्तलेखों का प्राप्त होना (जो आप के जीवनकार्यों के लिये अमूल्य रत्नथा) इत्यादि ईश्वरइच्छा हीसे प्राप्त हुआ था। आप की जन्म कुण्डली से एक ज्योतिषी ने ऐसा भविष्य कहाथा कि आप के हाथ से भारी यज्ञ होगा। आधे से आधिक जब आप के ग्रंथ प्रकाशित हो चुके तब आप को "यज्ञ" का अर्थ समझ में आया। जब कभी इस कार्य में कठिनाइया आती थीं तब आप ईश्वर से प्रार्थना करते थे और आप की कठिनाइयां सहज ही में दूर होजाती थीं।

वैष्णवपरिषद् के कोष से गट्टूलालजी के पुस्तकालय के हस्तलेखों को प्रकाशित करने का कार्य मूलचन्द्रजी की मदत से श्रीयुत मगनलाल शास्त्रीजीने प्रारम्भकर दिया था। मगर कोष की कमी होने से यह कार्य बन्द करना पड़ा था। श्रीयुत मगनलाल शास्त्री के पूना जाने के कारण खक्खर बिल्डिङ्ग में जो कथा होती थी वह बन्द हो गई मगर लोगों के कहने से वहां मूलचन्द्र जी अणुभाष्य और निबन्ध बांचने लगे। "सुन्नगोकुलजी झाला वेदान्त प्राईज" के लिये १९१५ में बम्बई विश्वविद्यालय ने एक विषय नियत किया, जो यह था "Discuss how far शङ्कराचार्य truly represents the view of the author of the ब्रह्मसूत्रs" श्रीपुरुषोत्तम जी के प्रकाश के दो चार परायण कर मूलचन्द्रजी ने लेख तय्यार किया। लेख की भाषा, लेखन पद्धति, विचार, तुलनात्मक लेखन कला अलङ्कार इत्यादि सब बहुत उच्च श्रेणी का था, जिनसे परीक्षकों के हृदय आनन्द से गद्गद् हुए होंगे, और मूलचन्द्र जीकी स्तुति उन्होंने अवश्य की होगी। लेख प्रकाशित होगया है और लोग उसे बडे चाव से पढते हैं। नडियाद के श्रीयुत त्रिभुवनदास के द्वारा सेवाफल का अनुवाद करने के लिये कहने पर मूलचन्द्र जी १९१५ मे साहित्य इकट्ठा करने लगे। आरम्भ में आपने १२ टीकाएं इकट्ठी की थी, और उनको प्रकाशित करने का विचार किया था। मगर श्रीयुत त्रिभुवनदास जी के पास कोष न होने से पोरबन्दर के गोस्वामी श्रीजीवनलाल जी के पास

मूलचन्द्र जी गये वहां आप को ५०० मुद्रा मिली। प्रकाशन कार्य आरम्भ हो गया और माला का प्रथम खण्ड १९१६ में प्रकाशित हुआ। इससे मूलचन्द्रजी की पुष्टि सम्प्रदाय में भारी नामवरी हुई। इसके बाद तीन और टीकाएं जलभेद के साथ प्रकाशित की गई थी।

मूलचन्द्रजी की पहली शादी उज्जैन में १९११-१२ में हुई थी। आप की स्त्री पवित्र हृदयवाली तथा धार्मिक भावों को रखने वाली एवं पतिभक्ती परायणा थी। इस समय आपने अपनी माता को भी बम्बई बुला लिया था। आप की आयु तो कम थी मगर जीवनयात्रा बहुत शान्ति एवं सन्तोष से करते थे। आप को १९१४ में लड़का और १९१५ में लडकी हुई। पर वह लडकी थोडे दिन की पाहुनी थी। इस लडकी के पीछे आपकी स्त्री का भी देहान्त हो गया। इस कारण से आप आप का परिवार भारी आपत्ति में पडा था। इतनी समाई न थी कि आप एक रसोइयां रखते और लडके को खलाने के लिये एक नौकर रखते।

गोस्वामी श्रीव्रजभूषणलाल जी के यज्ञोपवीत के समय मूलचन्द्रजी श्रीनाथद्वार और कांकरोली १९१९ में गये थे। आप के साथ श्रीयुत उत्सवलाल और अन्य मित्र भी थे। उनकी मदद से आपने कोटे का पुस्तकालय देखा और वहा के हस्तलेखों से बहुत सी बातें एकत्रित कीं। इस समय नाथद्वार के पुस्तकालय को भी आपने देखा था। और इसी समय श्रीटिप्पणीजी का प्रकाशन कार्य प्रारम्भ किया गया था।

१९२० में आप का दूसरा विवाह दसामोढ जाति में हुआ। इससे आप को दो लडके और एक लडकी हुई। श्रीयुत उत्सवलाल जी से निमन्त्रित होने पर आप आनन्द में गये थे। उन्होंने आप से कहा कि सूरत में हमने "रश्मि" देखा है। सूरत से रश्मि की हस्तलिखित प्रति मंगाई गई मगर उसकी स्थिति बहुत ही खराब थी। आपने जिस तरह से हो सका उस तरह से रश्मि की दूसरी दूसरी प्रतियां एकत्रित करना प्रारम्भ किया, आप की इच्छा थी कि भाष्य, प्रकाश और रश्मि ये तीनों एक साथ प्रकाशित करें। श्रीयुत गोवर्धनदास सूरदास ट्रस्ट का कोष को० श्रीगोकुलनाथ जीकी मदत से प्राप्त करने का सौभाग्य आपको प्राप्त हुआ था। आपने दूसरे कार्यों को छोड कर इसी कार्य में अपना तन मन लगा दिया मगर कराल काल का आकस्मिक आक्रमण होने से पूर्व आप इसके केवल तीन ही खण्ड प्रकाशित कर सके थे।

(१) श्रीतिलकायित महाराज श्री गोवर्धनलाल जी ने तथा चि०

श्री दामोदरलाल जीने आप को श्रीनाथद्वार में निमन्त्रित किया। अणुभाष्य के तीसरे अध्याय के कुछ पत्र और चौथे अध्याय का सम्पूर्ण हिस्सा आप को दिखलाया गया। श्रीगुसांई जी के हस्ताक्षर में उसे देख आप को भारी हर्ष हुआ।

श्रीयुत मूलचन्द्र जीमें आविष्कार करने की एक अलौकिक बुद्धि थी। आप की उत्पादक शक्ति ने, कल्पना शक्ति ने, धारणाशक्ति ने और साम्प्रदायिक-गाथाओं के पूर्ण ज्ञान ने इस बुद्धि में इतनी उठावदारी आगई थी कि फटे और पुराने से पुराने हस्तलेख पढने से आप समझ जाते थे कि वह किसका है, उसकी चोरी कहाँ से हुई, वह कब लिखा गया था, किसके हस्ताक्षर में लिखा गया है। इसके सिवाय आप की इस बुद्धि ने और भी कार्य किये हैं जिनमें से थोडों का उल्लेख नीचे किया जाता है।

(२) भरूची वैष्णवों का कहना है कि श्रीमद्वल्लभाचार्य जी का जन्मवर्ष १५२९ और जन्मस्थान चौडाग्राम था· मूलचन्द्र जी नें इन वैष्णवों से कल्लोल का एक हस्तलेख प्राप्त किया। इसमें नामकरण सम्बंध का पुराना एक श्लोक नहीं पाया जाता था और इसके स्थान में एक दूसरा श्लोक जिसमें उपर्युक्त जन्म वर्ष और जन्म भूमि का वर्णन पाया जाता था पुराना श्लोक निकालने का कोई भी प्रयोजन नहीं था मगर लेखक ने जान बूझकर किसी दूसरे हेतु से ऐसा किया था। जब से यह हस्तलेख देखा गया है तब से यह निश्चित हो गया है कि भरूची वैष्णवोंने दिया हुआ जन्मवर्ष और जन्मस्थान ठीक नहीं है।

(३) गो० श्रीकृष्णचन्द्रजी के सम्बन्ध में संप्रदाय को बहुत ही कम जानकारी थी गुणोपसंहार पाद की श्रीकृष्णचन्द्रजी की टीका भाष्यप्रकाशरश्मि के तृतीयखण्ड में प्रकाशित करने के लिये और भावप्रकाशिका वृत्ति के भिन्न भिन्न इतिश्रीयों की और चित्ताकर्षण करने के लिये जो तुलनात्मक लेखन पद्धति का आश्रय श्री पुरुषोत्तमजीने लिया था और जिससे यह ज्ञान होताथा कि कौनसा खण्ड श्रीकृष्णचन्द्रजीने और कौनसा श्रीपुरुषोत्तमजी ने लिखा था उससे मूलचन्द्रजीने सिद्ध कर दिखलाया कि श्रीपुरुषोत्तमजी श्रीकृष्णचन्द्रजीसे कितने बाधित है।

(४) डेकनकालेज भाण्डारकर इन्स्टिटयूटसे श्रीपुरुषोत्तमजी की अधिकरण माला का चौथा अध्याय प्राप्त कर मूलचन्द्रजीने प्रकाशित करवाया था। श्रीगो गोपेश्वरजी को यह नहीं प्राप्त हुआ था

इसीसे उन्होने स्वयं उसे लिखाथा। श्रीपुरुषोत्तमजी का भी अध्याय इसमे छापा गया है। इससे दोनो विद्वानो के विचारों का तुलनात्मक-अभ्यास करने में सुहलियत होगी।

(५) बृहद्भाष्य के कुछ खण्ड बहुत वर्ष हुए पाये गये थे जो पुष्टि भक्ति सुधा में प्रकाशित हुए थे। यह सबको ज्ञात था कि इसमें के शब्द, वाक्य वैसेही है जैसे प्रकाश और वृत्ति में पाये जाते है। बृहद्भाष्य के उसी खण्ड की प्रति मूलचन्द्रजी को प्राप्त हुई थी और उसे देखते ही आपने उसे रामकृष्ण भट्ट की बतलाया।

(६) मूलचन्द्रजीने सिद्धकर बतलाया कि सुबोधिनी का हस्त-लेख श्री गिरिधरलालजी के पुत्र दामोदरलालजी का लिखा है। इसी हस्तलेख से आपने तामस फल प्रकरण प्रसिद्ध किया था।

(७) षोडश ग्रन्थों की टीकाओं को एकत्रितकर एक ग्रंथ में प्रकाशित करने का विचार मूलचन्द्रजी का था आपने यह विचार कार्य में परिणत किया और इस माला के प्रकाशन में चीमनलालशास्त्री और हरिकृष्णशास्त्री ने मदत की थी।

(८) मूलचन्द्रजी ने श्रीगुसाईजी की सिद्धान्तमुक्तावली की टीका प्राप्त की थी और उससे दिखलाया कि इस को श्रीगुसाईजी ने कमसे कम चार बार ठीक किया होगा।

(९) मूलचन्द्रजी ने दिखलाया कि श्रीव्रजराजजी ने अपनी टीकाएं लिखकर और वह श्रीवल्लभजी के पास भेजी जिन्होने उसमे बहुत से फेर फार किये मूल से जो प्रतियां निकाली गई वह श्रीव्रज-राजजी के नाम से प्रसिद्ध हुई और जिनमे फेर फार किया गया था वह श्रीवल्लभजी के नाम प्रसिद्ध हुई।

(१०) मूलचन्द्रजी जब नाथद्वार में गये थे तब आपने सिद्ध कर दिया था कि भाष्य का चौथा अध्याय श्री गुसाँई जीने लिखा था।

(११) श्रीपुरुषोत्तमजी के हस्ताक्षर में फल प्रकरण का प्रकाश मूलचन्द्रजीको मिला और आपने उसे प्रकाशित करवाया।

(१२) भाष्य प्रकाश की दो प्रतियां आपने शोधकर प्राप्त की थी। उसमें से एक श्रीपुरुषोत्तमजी के हाथ की लिखी थी और दूसरी वह थी जिसमे श्रीपुरुषोत्तमजीने स्वयं फेर फार किया था। दोनों को मिलाकर एक प्रति मूलचन्द्रजी ने प्रसिद्ध कराई और इसी कारण प्रकाश और रश्मि में इमें फर्क मालूम होता है क्योंकि

रश्मिकार श्रीगोपेश्वरजी के पास प्रकाश की एक ही प्रति थी।

(१३) मूलचन्द्रजी ने श्रीगुसाईंजी के चरित्रको कुछ नये चाल की खुलावट दी थी।

(१४) मूलचन्द्रजी ने शोधकर बतलाया कि श्रीवल्लभाचार्यजी ने जो सुवर्णमेखला भेट की थी वह पंढरपुर के श्री विट्ठलनाथजी को नहीं बल्कि विजयनगर के श्रीविट्ठलनाथजी को की थी।

(१५) सूरत के गो० श्रीव्रजरत्नलालजी से श्रीपुरुषोत्तमजी का वसियत नामा लेकर मूलचन्द्रजी ने प्रकाशित कराया था।

(१६) पुष्टिभक्ति सुधा तथा वेणुनाद में मूलचन्द्रजी ने स्वयं एकत्रित किये हुए स्वतन्त्रलेख प्रकाशित कराये थे।

(१७) श्री योगी गोपेश्वरजी के रश्मि का शोध मूलन्द्रजी ने लगाया और बम्बई के बडे मन्दिर के श्रीगोकुलनाथजी की मदत से उसे प्रकाशित कराने की व्यवस्था आपने की थी।

सांप्रदायिक इतिहास का पूर्ण ज्ञान होने के कारण और जो प्रश्न आप के सामने उपस्थित होते थे उन के सम्बन्ध की बातों का ज्ञान होने से गोस्वामी बालकभी अपने अपने प्रश्नों को सुलझाने के लिये मूलचन्द्रजी की सलाह लेते थे। मद्रास और धराणगाव के मुकद्दमों मे बम्बई के श्रीगोकुलनाथजी को और उनके सुपुत्र श्रीकृष्णजीवनजी को मूलचन्द्रजी ने मदत दी थी। श्रीगोपेश्वरजी को भी उनके मद्रास वाले मुकद्दमे में आपने मदत दी थी।

संप्रदाय के लिये एक रिसर्च इन्स्टिटयुटकी आवश्यकता मूलचन्द्रजी के ही प्रयत्न से प्रतीत हुई थी और इस कार्य के लिये श्री० देवकीनन्दजी के पुत्र श्रीवल्लभलालाजीने बहुत अधिक किराये पर चार कमरे दिये थे, जहां १९८४ के चैत्र मे मूलचन्द्रजी रहने के लिये आये थे। परन्तु ईश्वर के मन मे कुछ और ही था। आप वहां आकर रहने लगे थे।गरमी की छुट्टी में आप भरोच गये। जून में लौटे मगर स्वास्थ्य ठीक नही था। आप के सिरमें यकायक १८ जूनको दर्द पैदा हुई और आपने २६ जुन १९२७ को गोलोक वास किया।

आप यों ही थोडी अवस्थात में गोलोक वासी हुए तो भी आपकी योग्यताने वुडरोफ (Woodroffe)की (keith) तनसुखराम मनसुखराम त्रिपाठी अनन्तशास्त्री जैसे विद्वानोंको अचम्भित कर दिया था। श्रीयुत तनसुरव रामजी आपके भाषण से बहुत संतुष्ट थे। अपने पुस्तकभण्डार में से हस्तलेख या पुस्तके जो मूलचन्द्रजी को आवश्यक लगता था देते

थे। शृङ्गाररसमण्डन की आपकी प्रस्तावना पढकर श्रीयुत केशव हर्षद ध्रुव इतने संतुष्ट हुए थे वह आपको देखने के लिये आये थे और साम्प्रदायिक ग्रन्थो को आपके साथ पढना चाहा था।

"दयारामनो अक्षर देह" की दूसरी आवृत्ती निकाल ने के हेतु ग्रन्थ में जो फेर फार करने की अवश्यकता थी उसे करने का मूल· चन्द्रजी को अधिकार दिया गया था।

"अतोन्यदार्तम्" इस वाक्य के अनुसार मूलचन्द्रजी के सांसारिक कार्य होते थे। यह सूत्र बृहदारण्यकोपनिषद् में है इसकासारांश यह है कि ईश्वर के सिवाय और सब दुःखदाई है। संसारसे आपको बहुत घृणा थी और बालपन से ही आपको यह तत्त्व ज्ञान प्राप्त हो गया था कि आनन्द तो आनन्द मयभगवान् में ही है।

आपका हृदय बहुत ही उच्च कोटि का था आपके पास सहायता लेने के लिये लोग सदा आया करते थे और आप भी यथा शक्ति सबों की मदत करते थे। देखा गया है, कि आप ऐसे को भी मदत करते थे जिसने आप को सताया हो। निर्णयसागर प्रेस के कर्मचारी, मा· लिक इत्यादि सब लोग आप से इतना प्रेम रखते थे कि जब किसी दिन उनको आपसे मिलने का मौका नहीं मिलता था तो वे उस दिन को एक खाली दिन समझते थे। एक प्रस्ताव की पूर्ति के लिये अपने मित्र के घर आपने जो प्रयत्न किये और दूसरी बार उसी मित्र के लाभ के लिये जो स्वार्थ त्याग किया और तीसरी बार उसी मित्र की इच्छा की पूर्ति के लिये अपने धन की परवाह नहीं की और जो प्रयत्न किया उसे देख बडा ही आश्चर्य होता है और आप की सज्जनता का पूर्ण परिचय प्राप्त हो जाता है।

आप भगवत् इच्छा को प्रधान मानते थे और इसी कारण जब कभी कठिन समय आता था तो आप जरा भी डगमगाते नहीं थे। आप के स्वभाव में तीन और गुण थे? अभय, स्वमान और निस्वा· र्थता, यद्यपि आप के पास कुछ नहीं था तो भी आप के स्वभाव से ऐसा प्रतीत होता था कि आप के पास सब कुछ है।

जब आप साम्प्रदायिक साहित्य की सेवा में रहते थे तब मालूम होता था कि एक राज्यका राजा अपने वजीरों के साथ काम कर रहा है। जब आप कार्य में गढ़े हुए रहते थे तब कभी कभी आपके लड़के पास आया करते थे और उन में से कोई तो गोद में कोई टेबल पर, जो हस्तलेखों से भरा हुआ रहता था बैठते थे मगर आप

खिजला नहीं जाते थे। आपका लक्ष्य गृहकार्य में न होने से आप की स्त्री कभी कभी क्रोधवश हो जाती थी मगर आप उससे तनिक भी खेद न मानकर शान्त रहते थे और कहते थे कि यह सब ईश्वर की इच्छा है। भगदाश्रय और धैर्य के कारण कैसा ही कठिन समय आता था आप शान्त रहते थे और अपने कार्य में सदा निमग्न रहते थे।

आपकी आकास्मिक मृत्यु से सम्प्रदाय की बहुत ही हानी हुई है। और वैष्णवोंका हृदय हिल गया है। गोस्वामी श्रीगोवर्धनलालजी तिलकायितने दो तार भेजे थे। एक तार आपके बच्चे और स्त्री के पोषण के सम्बन्ध में था और दूसरा एक सभा बुलाने के हेतु था। लालबावा श्रीदामोदरलालजी ने भी दो भेजे थे। बड़ामंदिर बम्बई में एक सभा हुई थी जिसमें गोस्वामी गोकुलनाथजी ने ५०० मुद्रा आपके स्मारक के हेतु दीथी। गोस्वामी श्रीरणछोड़दासजी ने भी २५१ मुद्रादान किया था। बहुतेरे स्थानो में शोक सभाएं हुई और प्रस्ताव पास हुए। और आपके स्मारक के लिये बहुत साधन इकट्ठा किया गया।

इन पङ्क्तियों के लेखक पर आप बहुतही प्रेम करते थे, तथा आवश्यकता पड़ने पर श्रीहरिरायजी, श्री पुरुषोत्तमजी श्रीगोपेश्वरजी आदि के हस्ताक्षरों से लिखित ग्रन्थ प्रदान कर सहायता देते थे, और साम्प्रदायिक साहित्य के प्रकाशन में उत्साहित करते थे। वैष्णव धर्म पताका कार्यालय में महाराज के कर्मचारियों के अत्यन्त घृणा जनक दुर्व्यवहार से दुःखी होकर मैं कामवन गया था और वहां से महाराज की अनवधानता के कारण सन्तप्त होकर जब बम्बई में आया और आप से मिला तब आपने अपने अनुभवों को सुनाकर मेरी जीवननौका को ठीक रास्ते से चलाने का उपाय बताया था। आपही की सलाह से पूर्वमीमांसा का ज्ञान प्राप्त करने के लिये मैं ने पुनरपि छात्रजीवन में प्रवेश किया। अब भी जब चित्त अस्वस्थ हो जाता है तब मैं इनके उपदेशों की आवृत्ति किया करता हूँ। मेरे चित्त को उसी से शान्ति मिलती है, प्रभु उन की आत्मा को शान्ति प्रदान करे।

काशी हिन्दू विश्वविद्यालय }
संवत्सर प्रतिपद् १९८५ }

मूलचन्द्र भाई का कृतज्ञ मित्र
"हरिः—"

सर्व प्रकार की संस्कृत पुस्तकें मिलने का पता—

जयकृष्णदास-हरिदास गुप्ताः—

चौखम्बा संस्कृत सीरिज आफिस, विद्याविलास प्रेस,

गोपालमन्दिर के उत्तर फाटक, बनारस सिटी ।

श्रीकृष्णाय नमः ।

विषयानुक्रमः ।

श्रीहरिरायविरचितो ब्रह्मवादः ।

श्रीहरिरायमहाप्रभुविरचित ब्रह्मवादानुवाद

श्रीकृष्णाय नमः ।

ब्रह्मवादः ।

ब्रह्माभिन्नः प्रपञ्चश्चेदस्मद्दृग्विषयः कथम् ॥
ब्रह्मभिन्नः प्रपञ्चश्चेद् ब्रह्मविद्विषयः कथम् ॥ १ ॥
अतोभेदस्तथाभेदः शक्यते वदितुं कथम् ॥
इति चेन्न यथा ब्रह्म रूप्यते तत्प्रपञ्चयोः ॥ २ ॥
सर्वोपनिषदाऽभेदः स्पष्टमेव निरूपितः ॥
अतोस्मत्प्रत्ययो भ्रान्तो मायावृतविलोकनात् ॥ ३ ॥
उत्पन्ने ब्रह्मविज्ञाने सद्यस्तद्बाधदर्शनात् ॥
अवास्तवं रूपमेतद्वाचारब्धं विकारि यत् ॥ ४ ॥
ब्रह्मबोधेऽनृतस्यापि ब्रह्मत्वात्प्रत्ययस्तथा ॥
यावद्बोधं तु सत्यस्यासत्यस्य कथनं पुनः ॥ ५ ॥
पश्चात्सर्वस्य सर्वत्वं नानृतं किञ्चिदस्ति हि ॥
देहादयोनृतं तावत् यावत् कार्यतया मतिः ॥ ६ ॥
तन्निवृत्तौ पुनः सर्वं ब्रह्मरूपं न संशयः ॥
देहादिष्वापि भक्तानां वियुक्तानां हरेर्मतिः ॥ ७ ॥
कार्यं च तादृशं लीलानुकृतौ तेषु दृश्यते ॥
एवं शुद्धो ब्रह्मवादो यद्यायादृधृदये सताम् ॥ ८ ॥

तदा मतान्तरासक्तिरपियायान्न चान्यथा ॥
मनान्तरेन्यथाबुद्धेः फलमप्यन्यथा भवेत् ॥ ९ ॥
मनोमनागपि नहि क्रियतां संशयास्पदम् ॥
हृदा सदा भावयन्तु ब्रह्मवादमलौकिकम् ॥१०॥
विचार्य वल्लभाचार्यं प्रचार्यमतमार्यजाः ॥
विदार्यसंशयं कार्यमनार्यमतदूषणम् ॥११॥

इति श्रीब्रह्मवादः संपूर्णः ॥

श्रीगोपीजनवल्लभाय नमः ॥

गोस्वामिश्रीहरिरायजीमहाराजविरचितः

ब्रह्मवादः ।

श्रीगोपालकृष्णभट्टविरचितविवरणाख्य-

व्याख्यासमलङ्कृतः ।

दुःखार्णवे निमग्नं मां कृपया करुणार्णवः ।
य उद्दधार मदनमोहनं तं भजे सदा ॥ १ ॥

रससलिलयुतं श्रीकृष्णमेघस्वरूपं
कलिकलुषनिदाघातप्तभक्ताऽवनाय ।
स्वमतसुजलवृष्ट्या शामकं वादवह्नेः
रसत इह लसन्तं वल्लभं तं नतोऽस्मि ॥ २ ॥

नानावादेन रविणा हरिणा तिमिरं महत् ।
मायावादाख्यमखिलं नाशितं तं नमाम्यहम् ॥ ३ ॥

अज्ञानतिमिरान्धं मां स्वप्रतापार्कतेजसा ।
सनेत्रमकरोच्छ्रीमद्गोपेश्वरमहं भजे ॥ ४ ॥

गुरुचरणविभावसोः प्रकाशादपगतसंशयमण्डलान्धकारः ।
रसिकहरिकृतेरभेद्यग्रन्थ्या विवरणमातनुते विनोदहेतुम् ॥ ५ ॥

गोष्ठीशालोपनामश्रीहरिकृष्णात्मजो मुदा ।
गोपालकृष्णः सुकविर्गोपेश्वरपदानुगः ॥ ६ ॥

अथ श्रीमद्गिरिवरधरणचरणपरिचरणमार्गमुकुलमार्त्तण्डायमान-हरिदासवर्य-श्रीमद्गोवर्द्धन-गिरिवरतादात्म्यं प्राप्नुवन्तो गोस्वामिनः श्रीमद्धरिरायचरणाः स्वीयानां परानभिभवपूर्वकं शुद्धाद्वैतपदवाच्यस्वमत-सिद्धान्तार्थावबोधनार्थं सोपपत्तिकमेतदेव वक्तुमेतदेव विचारमारभन्ते—

अथेदं विचार्यते । ननु भक्तिमार्गे माहात्म्यज्ञानजननहेतुत-

अथेत्यादिना । अथ शब्दो मङ्गलार्थः । इदं बुद्धिस्थमग्रे वक्ष्यमाणं च बहुवाक्यसन्दर्भरूपं शास्त्रं विचार्यते, विचारविषयीक्रियत इत्यर्थः । तथाच शिष्यशिक्षायै ग्रन्थारम्भे अथशब्देन मङ्गलाचरणपूर्वकं निरुक्तमिदन्त्वावच्छिन्नं विचारविषयीक्रियत इति वाक्याऽर्थः । "ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिष्क्रान्तौ तेन माङ्गलिकावुभा"वित्युक्तेः । विप्रतिपत्तिमुखेन स्वमतमुद्भावयन् पूर्वं तामेवाहुः । नन्वित्यादि । नन्विति विप्रतिपत्तिबोधकः । मृग्यते पुरुषोत्तमोऽनेन श्रवणादिनवकेनेति, श्रवणादिसाधनानुष्ठानात्मको मार्गः, न हि साधनपदेन पुष्टिमार्गानुपपत्तिः, अत्र फलसाधनयोरैक्यात् । प्रेम्णः सर्वत्रैवानुस्यूतत्वात्, तदग्रे वक्ष्यते । भक्तिरेव मार्गो भक्तिमार्गस्तस्मिन् भक्तिरसमार्ग इत्यर्थः । विभानुभावव्यभिचारिसात्त्विकादिभिरनुनीयमानस्य माहात्म्यज्ञानपूर्वकस्य स्नेहस्य रसत्वाद्भक्तेरसत्वम् । अन्यस्नेहव्यवच्छेदार्थं माहात्म्यज्ञानपदम् । "माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः । स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथेति" नारदपञ्चरात्रोक्तेः । "सा परानुरक्तिरीश्वरे" इति शाण्डिल्यसूत्राच्च । "फलाभिसन्धिरहिता परा" अस्य विभावादयस्तु ग्रन्थान्तरे(१) द्रष्टव्याः, ग्रन्थविस्तरभिया न लिख्यन्ते । अत्र भक्तिरसोऽन्यरसानामुपलक्षकः । तत्रापि शृङ्गाररसस्याभ्यर्हितत्वेन तस्यैव स्वाभीष्टत्वं ध्वनयति । तेन अन्ये तु तदन्तर्गता एव रसाः, तेषां तदन्तर्गतत्वेनैव रसत्वात्, अन्यथा "रसꣳ ह्येवायं लब्ध्वाऽऽनन्दी भवती"त्यादिश्रुतौ रसप्राप्तेरानन्दफलकत्वोक्त्या भयानकादौ तदभावाद्रसत्वमेव न स्यात् । तथा सति, "रसो वै स" इतिश्रुत्या, "सर्वरस" इति श्रुत्या च शृङ्गाररसरूपपुरुषोत्तमविषयकज्ञानपूर्वकस्नेहविषयकोऽयं मार्ग इति भावः । तत्रापि मार्गो, न सरणिः । राजमार्गे, यथा गमनसौकर्यं चौरादिभयाभावस्तद्वदत्यन्तायाससाध्यानां शमदमादिसाधनानामत्राप्रयोजकत्वेन अनायासेन तत् सूचितम् । पतनभयाभावोऽपि सूचितः । "तथा न ते माधव तावकाः क्वचिद् भ्रश्यन्ति मार्गात् त्वयि बद्धसौहृदाः । त्वयाऽभिगुप्ता विचरन्ति निर्भया विनायकानीकपमूर्द्धसु प्रभो" इति दशमस्कन्धे गर्भस्तुतौ, "धावनास्थाय नरो राजन् न प्रमाद्येत कर्हिचित् । धावन्निमील्य वा नेत्रे न स्खलेन्न पतेदिह" त्येकादशस्कन्धद्वितीयाध्याये चोक्तेः । अत एवाचा-

(१) स्वकृतसुधार्णवे ।

र्यचरणाः, "अत्रापि वेदनिन्दायाधर्मकरणात्तथा। नरके न भवेत् पातः किन्तु हीनेषु जायते" इत्याहुः। दुःखासम्भिन्नसुखरूपत्वं प्रथमतः अवधिपर्य्यन्तमिति राद्धान्तः। भक्तिशब्दस्य यौगिकार्थस्तु–भज् सेवायामिति धातोर्भावे क्तिन् प्रत्यये कृते भक्तिरिति भवति, भावश्च क्रियासामान्यम्, प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोस्तु प्रत्ययः प्राधान्येनेति वैयाकरणनियमाद् धात्वर्थव्यङ्ग्या या प्रधानभूता क्रिया तत्र पर्यवस्यति। प्रधानभूता च क्रिया मानस्येव। "अन्यत्रमना अभूवं नाऽशृणवम्, अन्यत्रमना अभूवं नाऽपश्यमिति" वाजसनेयश्रुतौ मनसः प्राधान्यश्रवणेन तत्क्रियाया एव प्राधान्यस्यौचित्यात्। तथाच सेवाभिव्यङ्ग्या प्रेमरूपमानसीसेवा भक्तिरिति तत्र योगरूढः सिद्ध्यति। तथा श्रवणादिनवकेऽपि पारिभाषिकः, "श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम्। अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥ इति पुंसाऽर्पिता विष्णौ भक्तिश्चेन्नवलक्षणा" इति सप्तमस्कन्धे प्रह्लादवाक्यात्। अन्ये तु, उपासनायामपि भक्तिशब्दं प्रयुञ्जते। नैयायिकास्तु, "आराध्यत्वेन ज्ञानं भक्ति"रित्याहुः। श्रीमत्कपिलदेवैस्तु, श्रवणादिकनवकस्य सात्त्विकादिभेदेन त्रैविध्युक्तम्। पुनश्च मिश्रितभेदैनैकैकस्य त्रिविधस्य त्रैविध्यं नव भवन्ति। तथाच नवकस्यैव नवनवभेदैरेकाशीतिप्रकारा सगुणा भक्तिरुक्ता, राद्धान्तिता तु, "अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी। जरयत्याशु या कोशं निगीर्णमनलो यथा" इति। अनिमित्तत्वकोशजारणत्वाभ्यां स्वरूपकार्यलक्षणाभ्यां गरीसी निर्गुणोक्ता। सा च मानसीसेवारूपा नारदपञ्चरात्रोक्ता शाण्डिल्यसूत्रोक्ता योगरूढेन भक्तिशब्देन प्राप्ताऽत्र विवक्षितेति निष्कर्षः। अत एव, "चेतस्तत्प्रवणं सेवा मानसी सा परा मते"ति श्रीमदाऽऽचार्यचरणाः। "भक्तिरस्य भजनं तदिहामुत्र फलभोगनैराश्येन तस्मिन् मनःकल्पनम्", "परो हि योगो मनसः समाधिरिति" श्रुतिपुराणोक्तेः। तथाच तादृशोऽस्मिन् मार्गे माहात्म्यज्ञानजननहेतुतया आनुकूल्येन उक्तः। महान् आत्मा शरीरमस्येति महात्मा ब्रह्म। 'बृहत्त्वाद् ब्रह्म उच्यते' इति वाक्यात्, महात्मनो भावो माहात्म्यम्, माहात्म्यस्य ज्ञानं माहात्म्यज्ञानम्। माहात्मनो ब्रह्मणो महिमज्ञानमिति यावत्। तस्य जननं समुद्भवः, तस्मिन् हेतुः, तस्य भावो हेतुता, तया कारणीभूतयेत्यर्थः। माहात्म्यज्ञानरूपस्यैव ब्रह्मज्ञानस्य भक्तेः पूर्ववर्त्तित्वान्नियतपूर्ववर्त्तित्वाद्धेतोः। "कारणाभावेन कार्याभाव" इति न्यायेन भक्तिविषयात्मकस्य भगवत्स्वरूपस्यैव ज्ञानाभावेन भक्तेरेवानु-

याऽऽनुकूल्येनोक्तः कोऽसौ ब्रह्मवादः ? ।
उच्यते, एकमेवाद्वितीयं ब्रह्म, पुरुष एवेदꣳ सर्वम्, एतदा-

पपत्तेः । आनुकूल्येनेति । अनुकूलस्य भाव आनुकूल्यं, जनकत्वम्, तेन भक्तिजनकत्वेन इत्यर्थः । यतो हेतुत्वमत एवानुकूलत्वम् । यद्वा अनुकूलत्वं सहकारिभावः । तथाच हेतुतया आनुकूल्येन चोक्त इत्यर्थः । अनुक्तोऽपि चः समुच्चयं वक्ति । विनाऽपि चं समुच्चयो भवतीति महाभाष्यप्रामाण्यात् । एवञ्च भक्तौ भगवतो ज्ञानस्याऽऽवश्यकता माहात्म्यज्ञानाय, माहात्म्यज्ञानस्य च प्रेमदार्ढ्याय । ज्ञानञ्च "जन्माद्यस्य यतः," "यतो वा इमानि," "सत्यं ज्ञानमनन्तं ब्रह्मे"त्यादिकार्यस्वरूपलक्षणाभ्यामुक्तं भवति । तत्र माहात्म्यं मनसाप्याकलयितुमशक्यरचनस्य जगतोऽनायासेनोत्पत्तिस्थितिभङ्गकरणं, लिप्तत्वालिप्तत्वं, भोक्तृत्वाभोक्तृत्वं, कर्तृत्वाकर्तृत्वम्, "अपाणिपादो जवनो ग्रहीते"त्यादिविरुद्धधर्माश्रयत्वं वा; तेन भक्तेर्ज्ञानस्य उपजीव्योपजीवकभावः, कार्यकारणरूपो वा सम्बन्धः सिद्ध्यति । अतस्तद्धेतुत्वं तत्सहकारित्वं चेति भावः । एतादृशोऽयं भक्तिमार्गे ब्रह्मवादः सिद्ध्यति । स च, कोऽसौ ब्रह्मवाद इति ॥ तादृशोऽश्रुतपूर्वोऽयं क इत्यर्थः ।

किञ्च तत्र का वा युक्तिः, किं प्रमाणं, कीदृशं च तत्स्वरूपमित्यत आहुः । उच्यते इति । एतत् सर्वं सङ्कुलीकृत्य एव अस्माभिः कथ्यत इत्यर्थः । तदेव दर्शयन्ति एकमेवेत्यारभ्य, तात्पर्यरूप इत्यन्तेन ।

एकमेवद्वितियमिति । सजातीयविजातीयस्वगतभेदवर्जितमित्यर्थः । तेन, एकमेवाद्वितीयमिति न पौनरुक्त्यम् । सजातीया जीवाः, विजातीया जडाः, स्वगता अन्तर्यामिणः । एकपदेन सजातीयभेदनिरासः, एवपदेन विजातीयस्य, अद्वयपदेन स्वगतानां जीवानाम् । सजातीयत्वन्तु, 'एकत्वे सत्यऽनेकानुगतत्वम्' जातिरिति जातिलक्षणाद् अनेका जीवाः, तदनुगता चित्स्वरूपा जातिः, तद्रूपतया साजात्यं ब्रह्मणः । तेन चित्साजात्येन ब्रह्मणो जीवैः साजात्यम् "यथा सुदीप्तात् पावकाद् विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपा" इति मुण्डकश्रुतौ सरूपपदाच्चैतन्यत्वनित्यत्वादिना सारूप्यात् तादृशसजातीयभेदवर्जितमेकमित्यर्थः । जडानां विजातीयत्वं च जडत्वानित्यत्वादिना । अन्तर्यामिणः स्वगतत्वञ्च प्रकटसच्चिदानन्दरूपत्वेऽपि परिच्छिन्नत्वप्रतिनियतकार्यकर्तृत्वादिना ज्ञेयम् । सजातीयद्वैतञ्च खण्डमुण्डगोव्यक्त्योरिव, विजातीयद्वैतं च

घटपटयोरिव ज्ञेयम् । कुसुमेषु तरोरनुस्यूतत्वेऽपि कुसुमरूपत्वाभावात्, सच्चिदानन्दरूपे भगवति त्रितयनिरूपितद्वैतराहित्येन, चिद्रूपेण जीवे, सद्रूपेण जडे, प्रकटानन्दरूपेणान्तर्यामिणीत्येवं त्रिष्वप्यनुस्यूतत्वात् । अत एव, "सजातीयविजातीयस्वगतद्वैतवर्जित"मिति श्रीमदाचार्यचरणाः । एवं कारणदशायां स्थितस्य ब्रह्मणोऽभेदप्रतिपादिकां श्रुतिमुक्त्वा कार्यदशायां स्थितस्य तत्प्रतिपादिकामाहुः—"पुरुष एवेदँ सर्वे"मिति । एषा तैत्तिरीयोपनिषदि सहस्रशीर्षाऽनुवाके । अग्रे, "यद्भूतं यच्च भाव्यमिति" । तयोरयमर्थः पुरुषः पुरुषोत्तमः, 'उत्तमः पुरुषस्त्वन्य' इति वाक्यात् । इदँ सर्वं यद्भूतं यच्च भाव्यं, भूतत्वेन भावित्वेन च व्यवह्रियमाणम् इदं घटपटात्मकं नामरूपेण भिन्नतया परिदृश्यमानपि सर्वं जगत् पुरुष एव । एतस्मिन्नुपादानकरणत्वेन पुरुषोत्तमस्यैवानुस्यूतत्वात् पुरुषोत्तम एव, नाऽन्य इत्यर्थः । एवकारस्य अत्रान्यव्यवच्छेदार्थकत्वात् । यतो, "जन्माद्यस्य यतः," "यतो वा इमानि," "तत्तु समन्वयादि"त्यादिश्रुतिसूत्रेषु पञ्चमी समवायिकारणमेव वक्ति, "जनिकर्त्तुः प्रकृति"रिति पाणिनीयसूत्रात्, तदेतत्, "तत्तु समन्वयादि"त्यादि"सूत्रभाष्ये स्फुटं निरूपितं श्रीमदाचार्यचरणैरिति नात्र वितन्यते । द्वितीयामपि तामाह—"ऐतदात्म्यमिदं सर्व"मिति, इयं श्वेतकेतूपाख्याने वर्त्तते । तत्रोपक्रमे, "अपि वा तमादेशमप्राक्षो येनाश्रुतं श्रुतं भवती"त्यादिना एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातम् । तदेकमेव चेत् सर्वं भवेत् तदोपपद्यते । यथा सुवर्णखण्डाः सुवर्णकार्यं च सर्वं सुवर्णमिति सुवर्णज्ञाने तज्ज्ञानं भवति । तदर्थं, "सदेव सौम्ये"त्यारभ्य निरूपितम् । तदनन्तरं जडस्य सर्वस्यापि तदात्मकत्वकथनाय, "ऐतदात्म्यमिदं सर्वमि"त्युक्तम् । एतस्या अयमर्थः—एतद् आत्मा यस्य स एतदात्मा ब्रह्म, तस्य भाव ऐतदात्म्यम् । "एतदात्मनः" अत्रापि पञ्चमी समवायिकारणं वक्ति । तथाच एतदात्मनः सकाशाद् मृदो घटादिवत् तत्सद्रूपेणेदं सर्वं जातमित्यर्थः । सदेव सौम्येति दृष्टान्तवाक्ये जडस्य तदात्मकत्वे उक्तेऽपि पुनर्दार्ढ्यार्थं दार्ष्टान्तिकवाक्येऽप्युक्तम् । अग्रे विनाशित्वादिजडगतदोषपरिहरणाय, तत्सत्यमिति । तत् पूर्वोक्तं सत्यं सर्वकालं सदित्यर्थः । तेन वैनाशिकाद्वैनाशिकप्रतिपन्ने असत्त्वविनाशित्वे मायावादिप्रतिपन्नं मायिकत्वञ्च निरस्तम् । तदग्रे च पूर्वोत्तरयोर्जडजीवयोः सदात्मकत्वे मध्ये हेतुमाह—स आत्मेति । स परमेश्वरः आत्मा सर्वस्य स्वरूपभूतः, अनागन्तुकानारोपितरूपः स इत्यर्थः । यथा सुवर्णं कटककुण्डलादीनाम् । तथाच सर्वस्य तदात्मकत्वात् सर्वं सत्यमिति

इदं सर्वं, स वै सर्वमिदं जगदित्यादिश्रुतिभिः प्रपञ्चरूपेणापि
मेव स्वस्याऽद्वयत्वेन तदतिरिक्तस्याऽभावात् स्वस्य क्रीडा-
रत्वेन प्रपञ्चरूपं संपादयितुं तद्रूपेणाविर्भूतो भगवानेवेति
त्पर्यरूपः ।

ादं मध्ये उक्तम् । पुनश्च जडस्य सर्वस्य तदात्मकत्वमुक्त्वा जीव·
ह । तत्त्वमसीति । तथाच यथैतदात्म्यमेतदात्मनो भावः, तथा
सि तद् एतदात्मनो भावः त्वं भवसीत्यर्थः । अत्र सच्चिद्रूपेण
येकाणं भगवान् जडे सद्रूपेणैवेति भेदः । असीतिमध्यमपुरुषणैव
त्राभात, तस्य भावस्तत्त्वमित्येकपदेनाऽपि नथार्थो भवतीति
मावरणभङ्गे श्रीमत्पुरुषोत्तमचरणैः । तथाच सर्वं तादृशार्थम·
ायैव श्रीमद्धरिरायचरणैर्महावाक्यरूपस्य सम्पूर्णपप्राठकस्य
केयं श्रुतिरुक्ता । यत एतत्सर्वं निरूपितमास्ति निबन्धविवरणम·
ष्विति दिक् ।

वै सर्वमिदं जगदिति'' पूर्वोक्तरीत्या स्पष्टम् । आदि·
"सन्मूलाः सौम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठानाः"
वा इदमग्र आसीत्" 'सदेव सौम्येदमग्र आसीत्" "स आ·
स्वयमकुरुते"त्यादिश्रुतयोऽत्रानुसन्धेयाः । प्रपञ्चरूपेणापि पूर्वं
न्तं, सदेव सौम्येदमग्र आसीदितिश्रुतितात्पर्य्यम् । तत्र हेतुः—
स्याभावादिति । सद्रूपस्य ब्रह्मणोऽतिरिक्तस्याभावादित्यर्थः ।
म्भिकां युक्तिमाहुः । स्वस्येत्यादि, आविर्भूत इत्यन्तम् । स्व·
:, आनन्दमात्रकरपादमुखोदरादिविशिष्टस्य पुरुषोत्तमस्व·
क्रीडा रसाद्यनुरूपं रमणमित्यर्थः । सा च तदनुकूलपदार्थैर्भिन्नैः
ीति षष्ठीतात्पर्यम् । "स ईक्षाञ्चक्रे, बहुस्यां प्रजायेय" इत्या·
। भेदोऽत्र हेम्नस्तत्कटककुण्डलादिवज्ज्ञेयः । यद्वा स्वैः, आ·
केर्भक्तैस्तदनुकूलतादृशपदार्थैरात्मीयैः करणभूतैः क्रीडतीति वि·
स्यै इति तदर्थं, तां कर्तुमित्यर्थः । एतेषां तादृशरूपत्वाभावे
िव्यसनाभावे सति रमणाननुभवप्रसङ्गात् । तस्माद्युक्तमा·
स्य क्रीडोपयोगिनामानन्दरूपत्वम् । सा चाधारेण विना न
ातस्तत्राधारापेक्षा तदाहुः—आधारत्वेनेति । स्वाधारत्वे·
। आधारश्च जडजीवात्मकः सच्चिद्रूपो भवतीत्यतः सच्चिद्रूपेण
: प्रपञ्चस्य सम्पादनम् । तदर्थमेव प्रपञ्चरूपेणाऽऽविर्भूतः

ननु भगवत एवं विलक्षणाभ्यां स्वरूपाभ्यां द्वैतापत्तिरितिचेन्न। "नेह नानास्ति किञ्चने"त्यग्रिमश्रुत्या तद्वैलक्षण्यानिषेधात्। तदर्थस्तु—

सकलजनपरिदृश्यमानो जातः। तद्रूपत्वादेवाविर्भावो, न तु जननम्, नित्यापरिच्छिन्नरूपत्वात्। नित्यापरिच्छिन्नतनौ प्राकट्यमित्युक्तेः। ननु सकलजनपरिदृश्यमानोऽन्य एव भविष्यतीत्याशङ्क्याहुः—भगवानेवेति। भगवान् पुरुषोत्तम एवाविर्भूतो, नान्य इत्यर्थः। "पुरुष एवेदँ सर्वमि"त्यादिनिरुक्तश्रुतिप्रामाण्यात् सदंशेन जडेऽत्र चिदानन्दांशौ तिरोहितौ, सच्चिदंशेन जीवे, अत्रानन्दांशस्तिरोहित इच्छातः। एतयोः क्रीडार्थमाविर्भावितत्वात्। तथाच काष्ठवह्निन्यायेन आविर्भूताऽनाविर्भूते स्वरूप एव च, "सत्यं ज्ञानमनन्तं ब्रह्मे"त्यादिलक्षणलक्षितं सच्चिदानन्दस्वरूपत्वं भगवत्त्वं जगतः सिद्ध्यति। हेम्नः कटककुण्डलादिवत्, कार्यकारणयोरैक्यादखण्डाद्वैतं ब्रह्मेति श्रुतीनां तात्पर्यम्। तथाच एतादृशतात्पर्यरूपोऽखण्डाद्वैतरूपोऽसौ ब्रह्मवाद इति पूर्वेण सम्बन्धः। अत एव, "अखण्डं कृष्णवत् सर्वमिति निर्गलितं वच" इति श्रीमदाचार्यचरणोक्तिः, "सर्वं खल्विदं ब्रह्मे"त्यादिश्रुतेः।

नन्वित्याशङ्कते। कार्यकारणस्वरूपयोर्वैलक्षण्यादेकस्यैव द्विरूपत्वाद् द्वैतापत्तिरित्यर्थः। नेति निषिद्ध्याग्रे समादधते नेति। नेह नानास्तीति। इयं श्रुतिः काठकोपनिषदि द्वितीयाध्याये प्रथमवल्ल्यामस्ति। तत्र प्रथमाध्याये प्रथमवल्ल्यां पूर्वं यमेन सर्वं नश्वरं निरूपितं श्रुत्वा सर्वस्यापारमार्थिकत्वं ज्ञात्वा पारमार्थिकं वरं याचितवान् शिष्यः। ततश्च द्वितीयवल्ल्यां विरक्तत्वेन परीक्षितं शिष्यं निःश्रेयसहेतुकेवलविद्यार्थित्वेन स्तोतुम् अभ्युदयनिःश्रेयसहेत्वोर्विद्याविद्ययोर्विभागमाह यमः। ततः पूर्वोक्तविद्याविद्यादीनां फलादिकं वक्तुं तृतीयवल्ल्यारम्भः। एवं प्रथमाध्यायसङ्क्षेपः। तदनन्तरं द्वितीयाध्याये पूर्वोक्तविद्यादिप्रपञ्चाऽभिधानाय प्रथमवल्ल्यारम्भः। "पराञ्चि खानीत्यारभ्य, तं देवासर्वेऽर्पितास्तदु नात्येति कश्चन एतद्वैतत्, यदेवेह तदमुत्र यदमुत्र तदन्विह" इत्यन्तम्। एतदर्थस्तु—देवा अधिदैवमग्न्यादयः, अध्यात्मं वागादयश्च अर्पिताः स्थितिकाले प्रवेशिताः। तं हिरण्यगर्भरूपं भगवन्तं नात्येति तदात्मकताम् अतीत्य तदन्यत्वं न गच्छति तादृशदेवतारूपमधिदैवमध्यात्ममित्येकवचनेन सम्बन्धः। य एतत् पश्यति, स वै इति नि-

इह सर्वरूपतया अद्वये ब्रह्मणि प्रपञ्चरूपेऽपि सच्चिदानन्दतयैकरूपे वस्तु नाना न, किन्त्वब्रह्मदृशामविद्यया भासत एवातो वैलक्षण्यम्। अत एव वाचारम्भणश्रुतिर्विकाराणां स्वदोषेण प्रतीतानां मिथ्यात्वं,

अयेन तत् प्राकरणिकं ब्रह्मैव पश्यतीत्यर्थः। उपक्रमोपसंहारे जीवेशयोरैक्यमुक्तम्। तन्मध्ये जडस्यापि तदुक्तम्। एवञ्च तन्नानात्वदर्शनविरोधादयुक्तमित्याशङ्क्य नानात्वदर्शनं भ्रान्तिरिति सूचयितुं वदति "यदेवेह तदमुत्र यदमुत्र तदन्विह" इह जीवोपाधौ अमुत्र ईशोपाधौ अनु उपाधिमनुप्रविष्टं तदेवेत्यर्थः। उपाधिकृतस्य भेदस्य मिथ्यात्वेन तद्दर्शनस्य निन्दां वदति "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" इति। इवशब्दोऽत्र चिद्रूपैक्याविरोधं सूचयति, तादृशभेदस्य तथात्वात्। व्यतिहारोक्तिरैक्यदार्ढ्याय विद्यानिवर्त्यत्वादविद्याकार्यत्वाच्च भेदस्य मिथ्यात्वमित्याह। "मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन"। मनसा आचार्याऽऽगमसंस्कृतेनैकाग्रेण। एवेन भेदग्राहिचक्षुरादिनिरासः। आप्तव्यं वेदितव्यम्। उत्तरार्द्धं भेददर्शननिन्दोपहासपरमिति केचित्। एतत् सर्वं कठवल्लीभाष्ये विस्तृतमित्यत्र दिशाऽवगन्तव्या। अग्रिमश्रुत्येति। पूर्वोक्तानामभेदबोधिकानां श्रुतीनामग्रिमया वैलक्षण्येऽपि द्वैतत्वनिषेधाच्च द्वैतापत्तिरित्यर्थः। हेम्नः कटककुण्डलादिवैलक्षण्येऽपि वस्तुतो द्वैताभाववत्। अत एव श्रुतिस्तादृशाऽभेदमाह। "यः पूर्वं तपसो जातमद्भ्यः पूर्वमजायत, गुहां प्रविश्य तिष्ठन्तं यो भूतेभिर्व्यपश्यत एतद्वैतदिति" "कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्नि"ति च। "न हि सत्यस्य नानात्वमविद्वान् यदि मन्यसे। नानात्वं छिद्रयोर्यद्वज्ज्योतिषोर्वा तयोरिव।" "यथा हिरण्यं बहुधा समीयते नृभिः क्रियाभिर्व्यवहारवर्त्मसु। एवं वचोभिर्भगवानधोऽक्षजो व्याख्यायते लौकिकवैदिकैर्जनैरि"त्याद्युक्तेश्च सच्चिदानन्दतयेति। जडजीवान्तर्यामिरूपतयेत्यर्थः। किन्त्वब्रह्मदृशामविद्ययेति। न ब्रह्मणि दृष्टिर्येषां ते अब्रह्मदृशस्तेषाम्। अविद्ययेति। मायाशक्त्येत्यर्थः। "यावत् स्याद् गुणवैषम्यं तावन्नानात्वमात्मनः। प्रतिबुद्ध इव स्वप्नान्नानात्वाद् विनिवर्तते" इत्याद्युक्तेः। अत एव "पराञ्चि खानि व्यतृणत् स्वयम्भूस्तस्मात् पराङ् पश्यति नान्तरात्मन्निति" श्रुत्या बाह्यज्ञानवतामिन्द्रियाणां स्वयम्भुवा हिंसनमुक्तम्। एवेति। निश्चितम्। अत इति। अविद्यया भासमानस्यापि भेदस्य मिथ्यात्वान्न विलक्षणत्वं, किं त्वेकरूपत्वमित्यर्थः। एतदेवोपष्टम्भयन्ति। अत एवेति। एकरूपत्वादेवेत्यर्थः। वाचा-

वस्तुत्वेन सत्त्वं चाह ।

रम्भणश्रुतिरिति । उत "तमादेशमप्राक्ष्यो येनाऽश्रुतं श्रुतं भवति" इत्यादि । "यथा सौम्यैकेन" इत्यादिप्रतिज्ञादृष्टान्तश्रुतिबलेन प्रपञ्चसमवायित्वं ब्रह्मणः प्रतिपादितम् । तत्र दृष्टान्तवाक्यशेषे वाचारम्भणमित्यादि श्रूयते। अस्यायमर्थः । यो विकारस्तद्वाचारम्भणम् । यदारभ्यते तदारम्भणम् । "कृत्यल्युटोबहुलमि"ति कर्मणि ल्युट् । वागारब्धकारणस्यैव नामधेयं, कारणमेव हि तत्तदर्थक्रियासिद्ध्यर्थे तेन तेन नाम्ना व्यवह्रियत इति कारणादभिन्नमेव कार्यं, न तु स्वेन रूपेण कारणाद्भिन्नत्वम् । तदाह "मृत्तिकेत्येव सत्यमि"ति । कारणरूपेणैव सत्यं, न तु मिथ्या । न च वाचारम्भणम् अनूद्य तस्य विकारत्वं विधाय ततस्तस्यैव नामधेयत्वनिगमनाद् विकारो वाङ्मात्रेणैवारभ्यते, न तु वस्तुतः खपुष्पवदिति वाच्यम् । ब्रह्मकारणत्वानुपपत्त्या "यतो वा इमानी"त्यादिश्रुतिव्याकोपापत्तेः । यदि च विकारो वाङ्मात्रतामभिप्रेयात् तदा वाचारम्भणं विकारो मृत्तिकैव सत्यमित्येव वदेत् । तावतैव मिथ्यात्वसिद्धेः । वदति त्वेवं, मृत्तिकेत्येव सत्यमिति । तेनोक्तार्थ एव सिद्ध्यति ।

अत एव कार्यबोधकश्रुतौ युक्तिविरोधं परिहृत्य कार्यबोधकवाक्यान्तरे श्रुतिविरोधपरिहाय सूत्रमाहुर्व्यासचरणाः—"तदनन्यत्वमारम्भणशब्दादिभ्य" इति सूत्रे आदिपदेन, इतिशब्दो, नामधेयपदं, सदेव सौम्येत्यादीनि वाक्यानि च सङ्गृह्यन्ते । अर्थस्तु निरुक्तप्रकार एव । यत्तु रामानुजाचार्या भास्कराचार्याश्चेदं सूत्रं मुख्यतया भेदवादनिराकरणार्थकम्, मायावादनिराकृतिस्त्वानुषङ्गिकीत्याहुः । तन्निराकृतमणुभाष्ये श्रीमदाचार्यचरणैः । पुरुषोत्तमचरणैश्च भाष्यप्रकाशेऽपि विशदतयानिरस्तम् । भेदवादस्य, "तर्काप्रतिष्ठानादि"ति सूत्रे पूर्वमेव निराकृतत्वात् । प्रकृतिवादश्च "प्रतिज्ञादृष्टान्तानुपरोधादि"ति सूत्रे पुरा निराकृतएवेति दिक् । विस्तरभिया नात्र वितन्यते ।

अत्र तु परमतरीत्यैव श्रुत्यर्थमादाय नानात्वं निराकुर्वन्नाहुः । विकाराणां स्वदोषेण प्रतीतानां मिथ्यात्वं वस्तुत्वेन सत्त्वं चाह वाचारम्भणश्रुतिरिति भवानप्याहेत्यर्थः । तथाच त्वन्मतरीत्याऽपि विकाराणां मिथ्यात्वे नानात्वाभाव एवेति भावः ।

ननु घटः शरावादिः पटः शिरोवेष्टनशाटकादयो बहवः सन्ति, तेषां कथमेकत्वमित्याशङ्क्य तस्य दृष्टान्तेन निराकरणपूर्वकं सिद्धान्त-

ननु वस्तुतोऽतथात्वे कथं तथाप्रतीतिरितिचेन्न ।' सितामूर्तीष्विव नानात्वप्रतीतावप्येकरूपत्वेन वस्तुनस्तथात्वाभावात् । अत एव न ब्रह्मविदां तथाप्रतीतिः । स्वरूपमात्रदृष्टित्वात् । ये पुनर्बहिर्दृष्टयस्तेषामेव तथात्वभानाद् न वस्तुनि तथात्वम् । तात्पर्यान्तविचाराभावेन तद्दृष्टेरसंमतत्वात् । अत एव विचारसिद्ध्यर्थकत्वेन

दृढीकरणार्थमाशङ्कन्ते । नन्विति । अतथात्वे, अनानात्वे, । तथात्वप्रतीतिः—नानात्वप्रतीतिरित्यर्थः । समादधते । नेति । सिताया बालानां क्रीडार्थं कङ्कणाद्याभरणानि, मन्दिराणि हस्त्यश्वादिमूर्तीश्च कुर्वन्ति, तासां नानाप्रतीतिर्भवति । तथाऽपि तासां सितात्वेनैकरूपत्वेन सितारूपवस्तुनो नानात्वाभावादित्यर्थः । तथाच ब्रह्मणः सर्वरूपत्वेऽपि ब्रह्मत्वेन नानात्वाभावादिति भावः । दृष्टान्तदार्ष्टान्तिके युक्त्यैवोपष्टम्भयन्ति । अत एवेति । एकरूपत्वादेव तेषां न मिथ्यात्वप्रतीतिरित्यर्थः । तत्र हेतुमाहुः । स्वरूपमात्रदृष्टित्वादिति । ब्रह्मस्वरूपमात्रदृष्टित्वं तेषाम् तस्मादित्यर्थः । कार्येऽपि दृष्टिस्तेषां, तथाऽपि कारणाऽनन्यत्वेन, न तु तत्पृथक्तयेति भावः । यथा बालानां सितावस्तुज्ञानाभावेन तत्क्रीडनकेषु नानात्वबुद्धिर्भवति, न तु सिताज्ञानवतां प्रबुद्धानाम् । अतः प्रबुद्धदृष्टिरेव समता, न तु बालदृष्टिः । तदेवोपपादयन्ति ये पुनरिति । बहिर्दृष्टय इति अन्तःस्थितस्य ब्रह्मणो दर्शनं येषां न भवति ते बहिर्दृष्टयः । तेषामेवेति अब्रह्मदृशामेवेत्यर्थः । तथात्वभानान्न वस्तुनि तथात्वमिति । वस्तुदृष्ट्यभावेनैकस्वरूपत्वाभावात्, न वस्तुन्येकरूपत्वाभाववत्त्वं नानात्वमित्यर्थः । तत्र हेतुमाहुः तात्पर्यान्तेत्यादि । तात्पर्यान्तविचाराभाववतां बालानां दृष्टेरसम्मतत्वादित्यर्थः । तात्पर्यं च एकेनैव मृदादिसमवायिकारणेन सर्वे घटपटादयो भवन्ति, तत्समवायिकारणञ्च ब्रह्मणः सदंशरूपम्, तच्च सर्वस्मिन्ननुस्यूतमतस्तद्रूपत्वेन सर्वस्यैकरूपत्वान्न क्वापि नानात्वम् । "नेह नानाऽस्ति किञ्चन," "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येवसत्यं," "तत् केन कं पश्येदि"त्यादिश्रुतीनां तात्पर्यम् । तदेव अन्तःसिद्धान्तो वादिप्रतिवादिभ्यां निर्णीतोऽर्थः । तत्र विचार एव नास्तीति तेषां कुतस्तन्निर्णयज्ञानम् ? विचारश्च—किं कारणं, किं कार्यं, कीदृशं च तयोः स्वरूपमित्यादिः । अतस्तेषां दृष्टेरसंमतत्वम् । तस्मादित्यर्थः । तदर्थमेव उत्तरमीमांसाशास्त्रमित्याहुः । अत एवेति । बहिर्दृष्टिबोधसापेक्षत्वादेवेत्यर्थः । विचारो

शास्त्रसार्थक्यम् । अत एव, अखण्डं कृष्णवत् सर्वमित्याचार्यवर्याः । तस्मात् सर्वरूपमद्वयं ब्रह्मेति सिद्धम् ।

नन्वेवं प्रपञ्चस्य भगवद्रूपत्वे मुमुक्षुसाधनोपदेशेषु तस्य हेयत्वोपदेशः कथं शास्त्रे युज्यते इतिचेत्, सत्यम् । स्वक्रीडार्थमेव

जिज्ञासा, तस्याः सिद्धिः फलं ज्ञानमिति यावत्, तदेव अर्थः प्रयोजनं यस्य तद्विचारसिद्ध्यर्थकं, तस्य भावः, बहुव्रीहौ कः । शास्त्रस्य । उत्तरमीमांसाशास्त्रस्येत्यर्थः । सार्थक्यं प्रयोजनवत्त्वम् । वेदस्य विचाराऽभावेन निर्विचिकित्सतया बोधाभावादित्यर्थः । "कर्माकर्मविकर्मेति वेदवादो न लौकिकः । वेदस्य चेश्वरात्मत्वात् तत्र मुह्यन्ति सूरय" इत्युक्तेः । न हि बहिर्दृष्टिसापेक्षमेवेदं शास्त्रं, किन्तु ज्ञानिसापेक्षमपि । तदुक्तमाचार्यवर्यैः—"असन्दिग्धेऽपि वेदार्थे स्थूणाखननवन्मतः । मीमांसानिर्णयः प्राज्ञे दुर्बुद्धेस्तु ततो द्वयमिति" । यद्वा ज्ञानिनां निरुक्ततादृशविचारसिद्ध्यर्थकत्वेन शास्त्रस्य, शास्तीति शास्त्रं वेदः तस्य, "नेह नानास्ति किञ्चन" "सर्वं खल्विदं ब्रह्मे"त्यादिरूपस्य सार्थक्यम् । अन्यथैतच्छास्त्रस्य वैयर्थ्यं स्यादित्यर्थः । अत्रार्थे उपष्टम्भकं प्रमाणमाहुः अत एवेति । तात्पर्यान्तविचारवताम् एतच्छास्त्रे अखण्डाऽद्वैतब्रह्मणः सिद्धान्तितत्वादेवेत्यर्थः । उपसंहरति । तस्मादिति स्वस्य क्रीडार्थमाधारत्वेन प्रपञ्चरूपं संपादयितुं तद्रूपेण भगवत एव प्रादुर्भूतत्वादित्यर्थः । सर्वरूपमद्वयं ब्रह्मेति सिद्धमिति । निरुक्तश्रुतितात्पर्यप्रमाणबलेन सर्वरूपतया अखण्डाद्वैतं ब्रह्मेति निष्पन्नमित्यर्थः ।

एवं प्रपञ्चस्य भगवद्रूपत्वे सिद्धे तस्य हेयत्वोपदेशो विरुद्ध्यत इति तन्निरासाय पूर्वमाशङ्कते—

नन्विति । मुमुक्षुसाधनोपदेशेष्विति । "इमा रामाः सरथाः सतूर्या न हीदृशा लम्भनीया मनुष्यैः" "स्वाराज्यतुष्ट उपशान्त इदंविजह्या"दित्यादिष्वित्यर्थः । तस्येति । प्रपञ्चस्येत्यर्थः । शास्त्र इति । वेदादौ । समादधते सत्यमिति । अर्द्धाङ्गीकारः । अस्ति यद्यपि हेयत्वोपदेशस्तस्य, तथापि तव मनीषितं भगवदतिरिक्तत्वं मिथ्यात्वं तु न समायाति, किन्त्वन्यत् प्रयोजनमस्तीत्याहुः क्रीडार्थमेवेति । क्रीडार्थप्रयोजनमेव प्रपञ्चसृष्टेः । तथाच प्रपञ्चसृष्टेः क्रीडाप्रयोजकत्वेन प्रपञ्चस्य न भगवदतिरिक्तत्वं मिथ्यात्वं, किन्तु भगवद्रूपत्वमेवेत्यर्थः । अन्यथा भगवत्क्रीडाया एव मिथ्यात्वापत्तेः, "एकोऽहं बहु स्यामिती"च्छाया मिथ्यात्वे पर्यवसा-

तत्सृष्टेस्तत्र विचित्रे रूपे जीवानां स्वीयत्वेनाऽऽसक्तिभ्रमनिवारणाय । अन्यथा मुक्ताऽधिकभक्तानामन्येषां वा भजनोपयोगितया

नात् सत्यसङ्कल्पत्वानुपपत्तेश्च । तस्मान्न मिथ्यात्वाय शास्त्रे हेयत्वोपदेशः, किन्त्वन्यप्रयोजनायेति । तदाहुः तत्रेत्यादिना । तत्र सृष्टौ । विचित्रे रूपे स्त्रीत्वपुंस्त्वयुवबालवृद्धत्वादिप्रकारके बन्धुसुहृदादिरूपे । जीवानामविद्यापरवशानां । स्वीयत्वेनाऽऽसक्तिः प्रीतिः—अहमेतेषां, मदीयाश्चेमे इत्याद्यात्मीयत्वरूपा, सम्बन्धरूपा वा । एतस्याश्च मिथ्यात्वाद् भ्रमरूपत्वम् । एतादृशाध्यासस्यैव तथात्वात् । "कस्य के पतिपुत्राद्या मोह एव हि कारणमि"ति वाक्यात् । अनर्थहेतुत्वेन दोषरूपत्वं च । तादृशभ्रमस्य, "अहं ममेति स्वीकृत्य करोति कुमतिर्मतिमि"त्यादौ निन्दाश्रवणात्तादृशासक्तिभ्रमरूपदोषनिवारणाय शास्त्रे प्रपञ्चस्य हेयत्वोपदेशो युज्यत इति पूर्वेण सम्बन्धः । एवं नो चेद् बाधकयुक्तिमाहुः । अन्यथेत्यादि । आसक्तिभ्रमनिवारणार्थत्वाभावे । मुक्ताधिकभक्तानामिति । मुक्तैरधिकाश्च ते । भगवान् "भजतां मुकुन्दो मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगम् ।" इत्यादिवचनाद् येषां भक्तिं ददाति भगवान् ते मुक्ताऽधिकाः पूर्णपुरुषोत्तमचरणपरिचरणपरायणान्तःकरणाः । भक्तिस्तु परब्रह्मप्रापिका, प्रवचनादिसाधनासाधनीया । "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुनाश्रुतेन यमेवैष वृणुते तेन लभ्य" इतिश्रुतेः । मुक्तिस्तु तप आदिसाधनसाध्या । "तपसा ब्रह्म विजिज्ञासस्वेति" श्रुतेः । तथा च पूर्वसाधनादिभिर्मुक्तिं प्राप्नुवन्तस्तदनन्तरं तीव्रविरहभावसंपत्तौ भगवत्कृपया वरणाधिकारं प्राप्नुवन्तो भक्ताः । ज्ञानिभक्तानामियं व्यवस्था । पुष्टिभक्तास्तु पूर्वत एव निःसाधनाः पुरुषोत्तमसेवापरायणान्तःकरणाः । वरणाधिकारसम्पत्तिस्तु तेषां पूर्वमेव जाता यदा भगवता सृष्टाः, कायिकसृष्टित्वात् तेषाम् "पुष्टिं कायेन निश्चय" इति श्रीमदाचार्यचरणवाक्पीयूषात् । "स वै नैव रेमे" "तस्मादेकाकी न रमते" "सद्वितीयमैच्छत्" "स हैतावानास"इत्यादिश्रुतेः । "भिन्नैव काचित् सा सृष्टिर्विधातुर्व्यतिरेकिणी" इति वाराहपुराणाच्च । ज्ञानिनां तु अन्तत एव मुक्ताधिकभक्तत्वम्, एतेषान्तु पूर्वत एवेति नितरां तथा । केवलज्ञानिनस्तुमुक्ता एव, न भक्ताः । "नाहं प्रकाशः सर्वस्य योगमायासमावृतः । ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः" इत्यादिवाक्यैर्ज्ञानिभक्तयोर्विवेक उक्तः श्रीमत्प्रभुचरणैः । "ज्ञानी चेद्भजते कृष्णं तस्मान्नास्त्यधिकः पर" इति प्रशंसावाक्यमपि । अत एव श्रीमदाचार्यचरणा निबन्धे तत्त्वदीपे,

तत्परिग्रहो न स्यात्। ब्रह्मविदां वा ब्रह्मत्वप्रतीतावहेयत्वबुद्धिर्न स्यात्। अतो भ्रमाद्रासक्तिस्तन्निवारणार्थमेव शास्त्रे तथोक्तिरिति जानीमः।

ननु तदा उपास्यत्वेन वेदान्तेषु प्रपञ्चरूपमेवोपदिश्येत। मूलरूपत्वात्। नचास्तु तथैवेति वक्तुं शक्यम्। "सर्वत्र प्रसिद्धोपदे-

---

'तदुपासनया ज्ञानात् परमाऽऽत्मत्वमस्य हि। ज्ञानमार्गे त्वेतदेव सेव्य' इति, भाष्येऽप्यानन्दमयाधिकरणे प्रपञ्चितमस्ति। "गतेरर्थवत्वमुभयथा हि विरोध" इति तृतीयाध्यायेऽपि। अतस्तादृशा मुक्ताधिकभक्ता ज्ञानिभक्ताः पुष्टिभक्ता इत्यर्थः। अन्येषां नेति। केवलज्ञानिनामक्षरज्ञानवतां मुक्तानाम्, अखण्डाऽद्वैतज्ञानवतामिति यावत्। भजनोपयोगितयेति। 'इदं हि विश्वं भगवानिवेतरः" "क्रीडार्थमात्मन इदं त्रिजगत् कृतं ते" 'क्रीडाभाण्डं विश्वमिदं, पातालमेतस्य हि पादमूलं, यावन्न जायेत परावरेऽस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोगः। तावत् स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेते"त्यादिवाक्येषु प्रपञ्चस्य भगवद्रूपत्वेन भगवद्भजनोपयोगित्वं व्यासचरणैः शुकचरणैश्चोक्तम्। मिथ्यारूपत्वे तस्य लीलारूपत्वमुपास्यत्वञ्च ते कथं वदेयुः। यतस्तेषां तद्रूपतया तस्य प्रपञ्चस्य परिग्रहः परिज्ञानमेव न स्यादित्यर्थः। तेषां ब्रह्मदृष्टित्वात्। अन्यदप्याहुः। ब्रह्मविदां वेति। यस्य ब्रह्मरूपत्वेन तेषामहेयत्वबुद्धिः। अत एव, पातलमेतस्येत्याद्याहुः श्रीमच्छुकादयः। अत इति। प्रपञ्चस्य ब्रह्मरूपत्वादित्यर्थः। तथोक्तिरितीति। हेयत्वोक्तिरित्यर्थः। एवं सर्वस्य ब्रह्मरूपत्वे सिद्धे तत्र हेयत्वोक्तिविरोधे परिहृतेऽप्युपास्यरूपस्य तद्भिन्नतयानिरूपणश्रवणात् प्रतिवादी प्रत्यवतिष्ठते—

नन्विति। यदा सर्वस्यैव प्रपञ्चस्य ब्रह्मत्वं तदा, "आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इत्याद्युपासनाविषयेषु वेदान्तवाक्येषु प्रपञ्चरूपमेव उपास्यत्वेन उपदिश्येत। भवन्मते तस्यैव मूलरूपत्वादित्यर्थः। ननु ब्रह्मणः सर्वरूपत्वेन सर्वरूपस्यैवोपदेशोऽस्तु उपासनावाक्येष्वित्याशङ्कायामाह—नचेति। तथैवेति। सर्वरूपस्यैव उपदेशोऽस्त्विति न च वक्तुं शक्यम्। तत्र हेतुमाह। सर्वत्रेति। अस्यार्थस्तु, सर्वत्र वेदान्तवाक्येषु प्रसिद्धस्य "निष्कलं निष्क्रियमि"त्यादिवाक्यबोधितस्य ब्रह्मण एव उपस्थितत्वेन उपदेशो, न तु प्रपञ्चरूपस्य

शादि"त्यधिकरणविरोधादिति चेन्न । वेदान्तेषु ज्ञानार्थमुपासनानिरूपणं चित्तशुद्धिहेतुत्वेन, न तु सिद्धे ज्ञाने । तथाचाज्ञान् प्रत्येव प्रपञ्चरूपे सर्वाधिकत्वज्ञानाभावेनोपासनाऽसिद्धेस्तद्भिन्नस्य तथात्वमुच्यते । सिद्धे तु ज्ञाने सर्वत्र ब्रह्मस्फूर्तिर्वरणे वा भक्तिरिति नोपासनावसर इति भेदेन पूर्वमुपास्यनिरूपणमित्यर्थः । अत एव, वासुदेवः सर्वमित्यादिवाक्यानि ।

नन्वेवं शुद्धब्रह्मवादे जीवनामपि तद्रूपत्वेन भजनानुपपत्तिरितिचेन्न । अंशत्वेनैव तद्रूपता तेषां, नांशिनः । ब्रह्मवादे सर्व-

---

तथात्वेनोपदेशोऽस्तीति । अधिकरणविरोधादिति । प्रथमाध्यायस्य द्वितीयचरणस्य प्रथमाधिकरणविरोधादित्यर्थः। नेति निराकृत्य समादधते वेदान्तेष्विति । तद्भिन्नस्य तथात्वमिति । अज्ञान् प्रत्येव प्रपञ्चाभिन्नस्य उपास्यरूपत्वमुच्यते, न तु ज्ञानिनः । वस्तुतः प्रपञ्चरूपस्य तद्भिन्नत्वाभावात् । तेषां प्रपञ्चरूपत्वे सर्वाधिकत्वज्ञानाभावेनोपासनाया असिद्धः । अतो न वस्तुतः प्रपञ्चोपास्यरूपयोर्भिन्नत्वं, किन्तु बालानुशासनार्थमेव तथोक्तिरिति भावः । "परोक्षवादो वेदोऽयं बालानामनुशासनमि"त्युक्तेः । तेन "द्रष्टव्यः श्रोतव्य" इत्यादिवाक्यानां निर्वाहः । पाताळमेतस्य-इत्यादौ तु प्रपञ्चरूपस्यापि भगवत उपास्यरूपत्वं निरूपितम् । अत एव "यावन्न जायेत परावरेऽस्मिन्नि"त्याहुः । सिद्धे त्विति । केवलब्रह्मज्ञानिनां सर्वत्र ब्रह्मस्फूर्तिः, अग्रे तु यथाधिकारसम्प्राप्तिः । सिद्धाधिकारिणां तु भक्त्या नोपासनाऽवसरः । इतिभेदेनेति । निरुक्तप्रकारेण भेदेनेत्यर्थः । तदुपष्टम्भकं भगवद्वाक्यानां निदर्शनमाहुः, अत एवेत्यादि । "वासुदेवः सर्वमिति स महात्मा सुदुर्लभः" "सर्वं वासुदेव" इत्येतादृशज्ञानवान् यो महात्मा सोऽतिदुर्लभ इत्यर्थः। आदिपदात् "स सर्वविद्भजति मां सर्वभावेने"त्यादीनां सङ्ग्रहः ।

एवं जडात्मकस्य प्रपञ्चस्य, ब्रह्मणः सद्रूपतया अभेदो निरूपितः । जीवाभेदस्तु तत्त्वमस्यादिवाक्यैश्चित्सजातीयतया निर्विवाद एवेत्यतो नोक्तः। तथापि जीवब्रह्मणोरैक्ये भजनाऽनुपपत्तिरित्याशङ्कां निरसितुं तामेवाहुः—

नन्वेवमिति । भजनानुपपत्तिरिति । तरतमभावाभावात् तदनुपपत्तिरित्यर्थः । "स एकाकी न रमते" इति श्रुतेः । यद्वा भगवद्रूपत्वे सिद्धे भजनस्याऽप्रयोजकत्वादनुपपत्तिरिति समादधते । अंशत्वेनैवेति ।

स्यैव ब्रह्मणः सर्वात्मत्वात् । परं तद्रूपेण । "इन्द्रो मायाभिः पुरुरूप ईयत" इति श्रुतेः । तथाच सहजांशानां पुनः पूर्वभावसम्पत्त्यर्थमविद्यादोषनिवृत्त्यर्थं च भजनोपपत्तिरिति भावः ।

ननु तथापि भजनमात्रपर्यवसायिनि पुष्टिमार्गे निवर्त्यदोषा-

सहजांशानामिति । "अंशो नानाव्यपदेशात्" "ममैवांशो जीवलोके जीवभूतः सनातनः" "यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणा" इत्याद्युक्तेः । अंशत्वं च राश्येकदेशत्वम् । पूर्वभावसम्पत्त्यर्थमिति । साम्प्रतं तु, "पराभिध्यानात् तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ"विति सूत्रादस्य जीवस्यैश्वर्यादि तिरोहितम् । तेन भजनादिकं न भवति । "नायमात्मा बलहीनेन लभ्य" इति श्रुतेः । अतः पुनरैश्वर्यादिभावसम्पत्त्यर्थमित्यर्थः । अविद्यादोषनिवृत्त्यर्थंचेति । राश्यैकदेशस्यांशस्य विभाजिकाऽविद्या, तस्याश्च भगवद्विच्छेदापादकत्वेन दोषरूपत्वम् । तन्निवृत्त्यर्थमित्यर्थः । नचैश्वर्यादिसम्पत्तावविद्यादोषनिवृत्तौ च भगवद्रूपत्वे एव सिद्धे भजनानुपपत्तिस्तदवस्थैवेति वाच्यम् । तत्र भगवत्कृतस्यैव तरतमभावस्य स्थितत्वात् । "स्वरूपेणावतारेण लिङ्गेन च गुणेन च । तारतम्यं न स्वरूपे देहे वा तत्क्रियासु वेति" श्रीमदाचार्योक्तौ मुख्यभक्तानां भगवद्देहेन गुणेन च साम्यमस्ति । भगवदवतारवत् । तद्वदेव तेषां प्रादुर्भावात् । भगवता सह नृत्यादिसामर्थ्यस्य विद्यमानत्वाल्लिङ्गसाम्यम् । गुणाः सौन्दर्यादयः । तत्साम्यं तु स्पष्टमेव । "ब्रह्मैव सन् ब्रह्माप्येतीति" श्रुतेः । एवं भगवत्साम्येऽपि भगवत्कृतं तत्र तारतम्यमस्तीति मन्तव्यम् । उत्कर्षापकर्षवैचित्र्येण विना सम्यग्रमणासिद्धेः । अत एवाग्रे आहुः श्रीमदाचार्यचरणाः— "तथापि यावता कार्यं तावत्तस्य करोतिही"ति । अत एव बाललीलादयो युक्तरूपा भवन्तीति दिक् ।

एवं सति सुखेन भजनोपपत्तिः । तेन, पुष्टि–पुष्टिपुष्टि–मर्यादा चेत्यधिकारत्रये यथायोग्याधिकारे सिद्धे, अलौकिकसामर्थ्यं पुरुषोत्तमसायुज्यं, सेवोपयोगी देहो वैकुण्ठादिष्विति सेवाफलोक्तं यथायोग्यं फलं भविष्यतीति भावः । भाव इति । श्रुतेर्भाव इत्यर्थः । पुनराशङ्कन्ते ।

नन्विति । भजनपर्यवसायिनीति । "तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः । न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह"त्यादिवाक्यैः कर्मज्ञानोपासनादीनामप्रयोजकत्वाद् भजनमात्रपर्यवसायीत्यर्थः । तस्मिन्

भावात् तदनुपपत्तिरितिचेन्न । तत्रापि पुरुषोत्तमांशानां तेषां लीलार्थं ततो वियुक्तानां पुनः संबन्धेन फलानुभवार्थं भजनस्यावश्यकत्वात् ।

नन्वेवं भजनस्य साधनत्वे पुष्टिमार्गत्वानुपपत्तिरितिचेन्न ।

पुष्टिमार्ग इति । पुष्टिः पोषणम् । अनुग्रह इति यावत् । पोषणं तदनुग्रह इत्युक्तेः । मार्गपदनिरुक्तिस्तु पूर्ववज्ज्ञेया । निवर्त्यदोषाभावादिति । निवर्त्यानामविद्यागुणानां कामादीनां दोषरूपाणां निवर्त्यत्वेनाभावादित्यर्थः । "अपिचेत् सुदुराचारो भजते मामनन्यभाक् । साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः" इति श्रीमत्प्रभुचरणोक्तेः, अजामिलादौ दर्शनाच्च । तदनुपपत्तिरिति । तथाचाकस्मिके श्रेयसि सिद्धे भजनप्रयोजनाभावाद्भजनाऽनुपपत्तिरित्यर्थः । नेति निषिध्य समादधते । तत्रापीति । निवर्त्यदोषाभावेऽपि तेषां जीवानां ततः पुरुषोत्तमाद्वियुक्तानां पुनर्भगवत्सम्बन्धेन तदनुभावार्थकत्वेन फलानुभवः प्रयोजनम् । यतो, लीलार्थमेव भगवता वियुक्ताः कृताः । तदर्थं भजनस्याऽऽवश्यकत्वेन सप्रयोजनकत्वानुपपत्तिरित्यर्थः । नच तर्ह्यविद्यानिवृत्त्यर्थं चेत्यनुपपन्नमिति वाच्यम् । तन्निवृत्तावेव फलानुभवात् । नच रासलीलायां कामादीनामपेक्षितत्वान्न तन्निवृत्तिरिति वाच्यम् । तस्यास्तद्गुणानां च तत्रालौकिकत्वेन लौकिकायास्तस्या निवृत्तेः । "श्रिया पुष्ट्या गिरा कान्त्या कीर्त्या तुष्ट्येलयोर्जया । विद्ययाऽविद्यया शक्त्या मायया च निषेवितमि"त्युक्तेः । नच तस्या बन्धनैकस्वभावत्वेन तत्र स्थितायां बन्धः सम्भवतीति वाच्यम् । लौकिकस्वभावं त्यक्त्वा अलौकिकतया तत्र तस्याः स्थितेः । "विलज्जमानया यस्य स्थातुमीक्षापथेऽमुयेत्यु"क्तेस्तदधिष्ठात्र्या मायायास्तत्र विलज्जमानत्वं तदा किं वाच्यमविद्यायाः । तथाच सभयतया सलज्जतया च स्वस्वभावं त्यक्त्वा यावद्रासलीलाकार्यं तदनुकूलमेव करोति । "भगवानपि ता रात्रीः शरदोत्फुल्लमल्लिकाः । वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रित" इति न कोऽपि शङ्कालेशः । तथाच लौकिकस्वभावायास्तस्यास्तु निवृत्तिरेवोचिता । तन्निवृत्त्यभावे फलानुभवासिद्धेः । अतस्तन्निवृत्तेरावश्यकत्वेन तदर्थं भजनस्यावश्यकत्वात् तदुपपत्तिर्युक्तेति तदनवद्यम् ।

एवं सति भजनस्याविद्यानिवृत्त्यर्थत्वेन फलानुभवार्थत्वेन च साधनत्वापत्तावाशङ्कन्ते—

नन्वेवमिति । तथाच तस्य साधनत्वेन फलस्य तत्साध्यत्वेन पुष्टे-

भजनस्य भावरूपत्वेन फलरूपत्वात् तस्य साधनत्वेऽपि न क्षतिः ।
पुष्टिमार्गः स एव यत्र फलं स्वयमेव साधनमित्यसकृदुक्तमाचार्यैः ।

कसाध्यत्वाभावात् पुष्टेमार्गः, तस्यानुपपत्तिः । तेन मार्गेण भगवति गमनाभावादित्यर्थः । न हि पुष्टिः स्वकृतिसाध्या भवति, किन्तु भगवदिच्छैकसाध्या । राजसेवकयोरिव । अतो या निःसाधनफला सैव पुष्टिः । अतः कर्मज्ञानोपासनादिमद्भजनस्यापि साधनत्वेन पुष्टिमार्गस्य तदसाध्यत्वात्तदनुपपत्तिरिति भावः । नेति, निषिध्य समादधते । भजनस्य तत्र भावरूपत्वेनेति । भजनं च भक्तिशब्दवाच्या क्रिया । "प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोस्तु प्रत्ययः प्राधान्येने"ति नियमादत्र धातुसामान्यार्थे शक्तोऽपि क्तिन्प्रत्ययो भजिसमभिव्याहारात् प्राधान्येन भजनक्रियां वक्ति । सा च सर्वात्मिका । सेवापदं च सातत्याभीक्ष्ण्यान्यतरपूर्वककायिकव्यापारविशेषपरिचर्यारूपेरूढम् । स्त्रीसेवा औषधसेवेत्यादिप्रयोगदर्शनात् । मत्सेवया प्रतीतञ्चेत्यादिस्वतन्त्रसेवाबोधकैर्वाक्यैस्तदवगमात् । केवलक्रियाया जलताडनादिवन्निष्फलत्वेन तत्र प्रेमपूर्वकत्वमभिव्यनक्ति भक्तिशब्दः । मत्सेवया प्रतीतञ्चेत्यादिवाक्येषु सर्वदा पूर्णत्वादिकथनात् प्रेमपूर्वकत्वस्यापि लाभात् । "वशीकुर्वन्ति मां भक्ताः सत्स्त्रियः सत्पतिं यथे"त्यादावपि दम्पतिदृष्टान्तेन तल्लाभाच्च । अन्यथा तस्याः कायक्लेशजनकत्वेन स्वतः पुरुषार्थत्वोक्तिभङ्गप्रसङ्गात् । एवं सति प्रेम्ण एव प्रयोजकत्वेन प्रत्ययार्थत्वेन च प्राधान्याद् भजनस्य तद्रूपत्वेन भावरूपत्वम् । तस्य मनोधर्मत्वादिति व्याकरणशास्त्रसरणिः । "सा पराऽनुरक्तिरीश्वरे" इति शाण्डिल्यसूत्रादनुरक्तिरूपायास्तस्या भावरूपत्वेन तद्वाच्यार्थे अभिव्यङ्ग्यतया भजनस्यापि तथा, यतो भावरूपत्वमत एव साधनरूपत्वं फलरूपत्वमुभयमपि सम्भवति । भावे सिद्धे अग्रे फलस्य तदतिरिक्तस्याभावात् । "अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी"ति तत्स्वरूपलक्षणात् । तच्च प्रेम भक्तिरसस्य शृङ्गाररसस्य स्थायिभावरूपम् । भावलक्षणं च रसानुकूलो विकारो भावः । स्थायित्वञ्च तस्य चरमसमयपर्यन्तस्थायित्वात् । अत एवाऽपुष्टपुष्टस्य तस्यैव साधनफलरूपत्वं युक्तम् । अपुष्टो भावरूपः पुष्टो रसरूप इति रसशास्त्रमर्यादा । स्थायी भावो रसः स्मृत इत्युक्तेः । तथाच पुष्टापुष्टोभयदशायामपि न रसत्वक्षतिः । यथा पूर्वमङ्कुरितस्य वृक्षस्य प्रौढदशावृत्तावपि वृक्षस्थितिरिति तदाहुः तस्य साधनत्वेऽपि न क्षतिरिति । तस्य फलरूपस्य साधनत्वेऽपि न फलरूपत्वक्षतिरित्यर्थः । तथाच रसरूपं फलम् । तच्च तदेव पूर्वभावरूपं

अत एव पूर्वं प्रादुर्भूय संयोगानुभवं कारयित्वा विरहेणाऽऽन्तरभजनं संपादयितुं भगवत एव मथुरागमनरूपत्याग उच्यते ।

नन्वंशत्वेऽपि जीवानां तदात्मकत्वेनान्यूनत्वाद् भजनानुपपत्तिस्तदवस्थैवेति चेन्न। बहु स्यामिति श्रुतेः । क्रीडार्थं तथाऽऽविर्भा-

---

भूत्वा स्वकार्यं साधयतीत्यतस्तस्यैवावस्थाद्वयमिति बोध्यम् । वस्तुतस्तु प्रेम्णोऽवस्थात्रयं भवति, प्रेमासक्तिर्व्यसनं चेति । अत एव श्रीमदाचार्यचरणाः, "ततः प्रेम तथासक्तिर्व्यसनञ्च यदा भवे"दित्याहुः । पुष्टिमार्गः स एवेति । यत्र फलं स्वयमेव साधनमिति । अयमर्थः यदा हि भगवाननुगृह्णाति, न हि तत्र साधनापेक्षा । किन्तु महता साधनेनाप्यऽलभ्यमपि निःसाधनतयैव केवलं भगवत्प्रसादेनैव लभ्यं भवति । "किमलभ्यं भगवति प्रसन्ने श्रीनिकेतन" इत्युक्तेः । तथाचानुगृह्य भगवान् फलमेव ददाति । तच्च दोषबाहुल्यात् पूर्वमपरिपूर्णो भूत्वा तन्निवृत्तिरूपं साधनकार्यं कृत्वा पुनः पूर्णतया रसरूपो भवतीति भावः । तच्च भावरूपं रसरूपञ्च फलं भगवानेवेति राद्धान्तः । "रसो वै स" इति श्रुतेः । "स्थायी भावो रसः स्मृत" इत्युक्तेश्च । भावरूपत्वेन फलरूपत्वेन च साधनफलोभयरूपत्वमपि भगवति सिद्धम् । अत एव हि भगवानेव हि फलमिति श्रीमदाचार्यचरणाः । अतः सुष्ठूक्तं श्रीमद्गुसाँइचरणैरपि, फलं स्वयमेवेति । स्वयं भगवानेवेत्यर्थः । स्वस्वरूपबलेन स्वप्रमाणं पुष्टिरित्युच्यते इति, "गतेरर्थत्त्व"मिति सूत्रभाष्येऽपि । तथाच साधनानपेक्षत्वे सति साधनानन्यफला पुष्टिरिति लक्षणं बोध्यम् । शमदमादिसाधनव्यावृत्त्यर्थं सत्यन्तं पदम् । नचात्र श्रवणादीनां साधनत्वमिति वाच्यम् । तेषामप्यत्र प्रेम्णाऽविनाभावितेन फलरूपत्वात्, पौर्वापर्येणापि सम्भवाच्च । तत्र प्रमाणमाचार्योक्तिरित्याहुः । असकृदुक्तमाचार्यैरिति । सुबोधिन्यादावुक्तमित्यर्थः । एतदेव लीलानिदर्शनेनोपष्टम्भयन्त आहुः । अत एवेति । उच्यते । श्रीभागवतादावुच्यत इत्यर्थः ।

पुनराशङ्कामाहुः—

नन्वंशत्वेऽपीति । साम्यात् सेव्यसेवकभावाभावेन तदनुपपत्तिरित्यर्थः । नेति निषिध्य समादधते बहु स्यामिति । न्यूनत्वसत्त्वे सेव्यसेवकभावसिद्धौ नानुपपत्तिस्तदवस्थेत्यर्थः । ननु सृष्टौ उच्चनीचभावेन प्रादुर्भावेच्छा, न तु मुक्तिदशायामतो न्यूनत्वस्याऽवास्तवत्वान्मुक्ति-

वान्नानुपपत्तिः काचित् । नन्वेवं तथाप्यनुपपत्तिरितिचेन्न । न्यूनत्वविशिष्टस्यैव तस्याविर्भावात् ॥

ननु तदेच्छायाः करणत्वानुपपत्तिरितिचेन्न । इच्छाया ह्याविर्भावे कारणत्वं, न स्वरूपान्यथाकृतौ । तस्मान्मुक्तावपि कौस्तुभरूपेण स्थितिरिति भूषणरूपत्वेन न्यूनतायामन्यस्य तथात्वे किं वाच्यम् ? इति कैमुतिकन्यायेन तदात्मकत्वेऽपि तदंशत्वेन न्यूनत्वं वास्तवमेवेति भावः । अत एवांशानामपरिमितानां सृष्टौ वह्निविस्फुलिङ्गवन्निर्गमेऽपि न न्यूनता । हस्ताद्धस्तान्तरस्थिताविव तद्रूपे प्रपञ्चे स्थितत्वान्न न्यूनताशङ्कापीत्यर्थः । नन्वेवं जीवानां

दशायां जीवन्मुक्तौ साम्यमन्यथा लय इति सेव्यसेवकभावानवसरेण भजनानुपपत्तिस्तदवस्थैवेत्याशङ्कन्ते । नन्वेवमिति । नेति निषिध्य समादधते । न्यूनत्वविशिष्टस्यैवेति । तस्येति । जीवस्येत्यर्थः । प्रथमतोऽवधिपर्यन्तं पुष्टिसृष्टित्वेनैव भगवता विचारितत्वादिति भावः । "एष उ एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति, एष एवासाधु कर्म कारयति तं यमधो निनीषती"त्यादिश्रुतेः । अन्यथा भक्तिमार्गोच्छेदप्रसङ्गेन, "मत्सेवया प्रतीतञ्च" त्यादिवचनव्याकोपापातात् ।

नन्वेवं सति न्यूनत्वस्य वास्तवत्वे तत्र वस्तुस्वभाव एव कारणं, न त्विच्छेत्याशयेन आशङ्कामाहुः—

नन्विति । नेति निषिध्य समाधानमाहुः । इच्छाया इति । वस्तुस्वभावोऽपीच्छाकृत एव वस्तुनोऽपि कर्तृपरतन्त्रत्वाद् यादृशं वस्तुस्वरूपं यादृशश्च स्वभावस्तादृशाविर्भावे एवेच्छायाः कारणत्वं, न तु तत्स्वरूपान्यथाकृतौ । प्रयोजनाभावेन तादृशेच्छाया एवासत्त्वादित्यर्थः । तस्मादिति । स्वरूपान्यथाकृतौ इच्छायाः कारणत्वाभावाद्धेतोः । कौस्तुभरूपेणेति । "चैतस्य तत्त्वममलं मणिमस्य कण्ठ" इत्याद्युक्तेः । कैमुतिकन्यायस्तु स्पष्ट एव । भाव इति । "बहु स्यां प्रजायेये"ति श्रुतेर्भाव इत्यर्थः । अथ वास्तवत्वं युक्त्यैवोपष्टम्भयन्ति । अत एवेति । वास्तवत्वादेवेत्यर्थः । अपरिमितानाम्—असंख्यातानाम् । वह्निविस्फुलिङ्गवन्निर्गमेऽपीति असकृन्निर्गमेऽपीत्यर्थः । न न्यूनतेति । भगवतीति शेषः । तदेव दृष्टान्तेन द्रढयन्ति । हस्ताद्धस्तान्तरस्थिताविवेति । न्यूनताशङ्कापीति स्पष्टोऽर्थः । पुनराशङ्कन्ते नन्वेवमिति । अंशत्वाविशेषाद्दैवासुरविभागः कथमित्यर्थः । क्रीडार्थं

सहजहर्यंशत्वे दैवासुरविभागस्तेषु कथमिति चेत्, क्रीडार्थं तदिच्छयेति गृहाण । अत एव फलदशायामपि न्यूनत्वसत्त्वेन भजनस्य फलता । अन्यथा स्वतन्त्रभक्तिमार्गोच्छेद एव स्यात् । अतो जीवेषु सहजन्यूनत्ववद् ब्रह्मणि सर्वाधिकत्वम् ।

ननु तथापि न्यूनाधिकभावः कथम् ? । अंशत्वेन सत्त्वादिति चेत् । अत्र वदामि । भगवान् भेदेन क्रीडार्थं प्रपञ्चरूपमात्मानमाविर्भावयति । अत्रायं प्रकारः । सच्चिदानन्दं ब्रह्म । तस्य च धर्मरूपं तात्त्रितयात्मकमक्षरम् । तस्य च चिदंशा जीवाः क्रीडार्थमिच्छया कृताः । अन्यथा क्रीडावैचित्र्याभावेन न स्यात् । अत एव जडजीवान्तर्यामिष्वेकैकांशतिरोभावस्तथेच्छा च । अतः समुदितपृथक्करणं क्रीडार्थम् । तत्र मूलरूपेण क्रीडा बन्धमोक्षाभ्यामेव ।

तदिच्छयेति स्पष्टम् ।

तत्रापि पूर्वपक्षमाहुः—

ननु तथापीति । न हि केवलं विभाग एव, किन्तु तत्र न्यूनाधिकभावः । स च समत्वात् कथं सम्भवतीत्यर्थः । तथाचात्र समाधानं वक्तुमाहुः—अत्र वदामीति । समाधानं कथयामीत्यर्थः । अभेदेनेति । कारणरूपः कार्यस्वरूपश्च स्वयमेवेत्यभेदेनेत्यर्थः । अन्यथेति । पृथक्करणे वैचित्र्याभावेनेति । पृथक्करणं वैचित्र्यार्थम् । वैचित्र्यं चात्र न्यूनाधिकभावरूपम् । तथाच न्यूनाधिकभावरूपेण वैचित्र्याभावेनेत्यर्थः । अत एवेति वैचित्र्यादेवेत्यर्थः । एकैकांशतिरोभाव इति । एकैकांशाधिक्येन तिरोभाव इत्यर्थः । सच्चिदानन्दरूपोऽन्तर्यामी । तदपेक्षया जीवे एकस्यानन्दांशस्येति भावः । जडे चिदानन्दयोस्तिरोभाव इत्येकाधिक्यमिति भावः । तथेच्छा चेति । एकाधिक्यांशतिरोभावेच्छेत्यर्थः । तादृशतिरोभावस्य स्वतन्त्रतानिराकरणार्थं चकारः । अत इति । इच्छात इत्यर्थः । समुदितरूपस्येति । स्वस्य समुदिरूपस्येत्यर्थः । ननु स्वरूपस्य पृथक्कृतिः कथं भवेदित्याशङ्कायामाहुः—तच्चेत्यादि । तत्रेति । स्वरूपस्य पार्थक्ये सति । ननु तथा सति स्वस्य भोक्तृत्वानुपपत्तिरितिचेत्तत्राहुः—मूलरूपेणेति । क्रीडा बन्धमोक्षाभ्यामिति । क्रीडा रमणम् अविद्यया विद्यया चेत्यर्थः । नच तर्हि मूलरूपस्यापि बद्धमुक्तत्वाभ्यां जीवतुल्यतापत्तिरिति वाच्यम् । बद्धमुक्तव्यतिरिक्तस्वरूपेणैव तस्य स्थितत्वात् । अंशित्वेन तद्भेदाच्च ।

ततो लीलानित्यत्वसिद्धये बन्धमोक्षावपि नित्यौ वाच्याविति दैवासुरविभागः ।

ननु तथापि किं दैवत्वमसुरत्वं चेतिचेत्, उच्यते, सृष्टौ शक्तेः पृथक्करणेन तत्परिगृहीतत्वमसुरत्वं, स्वपरिगृहीतत्वं दैव-

"बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः । गुणस्य मायामूलत्वान्न मे मोक्षो न बन्धनमि"ति प्रभुचरणोक्तेः । तत इति । यतो बन्धमोक्षाभ्यां क्रीडा, तस्मादित्यर्थः । लीलानित्यत्वसिद्धय इति । लीलोपकरणस्य प्रपञ्चस्य लीलायाश्च नित्यत्वात् तत्सिद्धय इत्यर्थः । प्रपञ्चस्य प्रपञ्चरूपस्य भगवद्रूपत्व(१)निरूपणेनाऽस्मिन् ग्रन्थ एव पूर्वं निरूपितम् । "तदेतदक्षयं नित्यं जगन्मुनिवराऽखिलम् । आविर्भावतिरोभावजन्मनाशविकल्पवदि"त्यादिवाक्यानि बहूनि सन्तीति दिक् । भाष्यनिबन्धविद्वन्मण्डनादिषु विस्तरेण निरूपितं श्रीमदाचार्यचरणैः । अत इतोऽधिकप्रेप्सावद्भिस्तत्र द्रष्टव्यम् । उपकरणस्य नित्यत्वाल्लीलाया नित्यत्वं कैमुतिकन्यायसिद्धम् । अन्यथा उपकरणानित्यत्ववैयर्थ्यापातात् । भगवद्भोक्तृत्वस्यानित्यतापत्तेश्च । लीलाया नित्यत्वं तु, "जयति जननिवासो देवकीजन्मवादो यदुवरपरिषत्स्वैर्दोर्भिरस्यन्नधर्मम् । स्थिरचरवृजिनघ्नः सुस्मितः श्रीमुखेन व्रजपुरवनितानां वर्द्धयन् कामदेवमि"ति वाक्ये जयतीति वर्त्तमानप्रयोगेण अस्यन्निति वर्धयन्निति च शत्रन्तपदाभ्यां वर्तमानत्वं श्रीशुकैरुक्तमित्यादि विवृतं विद्वन्मण्डने श्रीमद्विट्ठलाचार्यचरणैर्ग्रन्थविस्तरभियाऽत्र न प्रपञ्च्यत इति दिक् ।

एवं सति लीलाया नित्यत्वेन तत्सिद्धये बन्धमोक्षावपि नित्यौ वाच्याविति, "एकस्यैव ममांशस्य जीवस्यैव महामते । बन्धोऽस्याविद्ययानादिर्विद्यया च तथेतर" इति भगवदुक्तेः । तदनन्तरं बद्धमुक्तवैलक्षण्यनिरूपणे, "यो विद्यया युक् स तु नित्यबद्धो विद्यामयो यः स तु नित्यमुक्तः" इत्युक्तेश्च । इतीति । बद्धमुक्तप्रकारेणेत्यर्थः । इति दैवासुरविभाग इति । यद्यप्यंशत्वेन समत्वं, तथापि बन्धमोक्षाभ्यां नीचोच्चत्वस्य सत्त्वादिच्छया क्रीडार्थं दैवासुरविभाग इति भावः

दैवत्वस्यासुरत्वस्य च लक्षणं वक्तुमाशङ्कन्ते—

नन्विति । उच्यते इति । तल्लक्षणं कथ्यते इत्यर्थः । सृष्टाविति । शक्तेः पृथक्ककरणेनेति । कार्यार्थं शक्तेर्मायायाः पृथक्करणम् । पार्थक्यं च, अहं

(१) नित्यत्वमित्यादि. ।

त्वमिति विवेकः । भगवदंशत्वेऽपि मोहार्थं सृष्टौ पृथग्भूतया परिगृहीतत्वादासुराणां सम्पुटनिःसारितस्य चोरहस्तपतितस्योपायसहस्रैरप्राप्यस्य द्रव्यस्य सम्पुटप्रवेशाभाव इव पुनर्भगवतिप्रवेशाभावः । दैवानां तु करकालितस्य रत्नस्य समाकृतस्य पुनः सम्पुटप्रवेश इव भगवति प्रवेशः । अत एव सृष्टिमात्रमसुराणां भगवतोऽन्यन्मायया एव । तत्कृतमोहेन ज्ञानभक्तिरूपशक्तिद्वयकार्याभावेन सायुज्यासंभवात् । अत एव भगवता, मामप्राप्यैवेत्युक्तम् । तयोरेव

ममेत्यादिकार्ये अनुमीयते । तत्परिगृहीतत्वमिति । शक्तिपरिगृहीतत्वमित्यर्थः । तथाच न ते कदापि मोक्षमार्गानुयायिनो भवन्ति, तत्प्रतिबन्धका एवेत्यसुरत्वमित्यर्थः । स्वपरिगृहीतत्वमिति । स्वेन भगवता परिगृहीतत्वमित्यर्थः । परिग्रहो विवाहः । "वशे कुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा," "यमेवैष वृणुत" इत्याद्युक्तेः । तथाच भगवता विवाहिता दैवाः, मायया विवाहिता आसुरा इति विवेकः । विवाहश्च द्वयोरप्यपरित्यागे प्रयोजकः । तथाच भगवता परिगृहीतास्ते कदापि भगवन्तं न त्यजन्ति । भगवानपि तान् कदापि न त्यजति । अन्यथैकत्र पातिव्रत्यहानिरेकत्र पुरुषत्वहानिरिति न कदापि परित्याग इति । दैवत्वं देवसम्बन्धित्वमित्यर्थः सत्स्त्रियः सत्पतिं यथेत्यत्र द्वयोरपि सत्पददर्शनात् । असुरमाययोरपरित्यागस्तु भगवदिच्छाकृत एव । "मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिमि"त्युक्तेरिति दिक् ।

एवञ्चासुराणां न कदापि भगवत्प्राप्तिः । "न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः । मायायाऽपहृतज्ञाना आसुरं भावमाश्रिता" इति भगवतोक्तेः । दैवानां तु साहजिकीति दृष्टान्ताभ्यामुपपादयन्तआहुः—भगवदंशत्वेऽपीति । भगवति प्रवेश इत्यन्तं स्पष्टम् । अत एवेति । चोरहस्तपतितत्वादेवेत्यर्थः । अन्यदिति । अन्यलयमपि मायया मायायामेवेत्यर्थः । तत्कृतमोहेनेति । मायाकृतमोहेनेत्यर्थः । ज्ञानभक्तिरूपशक्तिद्वयकार्याभावेनेति ज्ञानभक्तिरूपद्वयाभेर्गवच्छक्त्योः कार्यं सायुज्यादि तदभावेनेत्यर्थः । सायुज्यासंभवादिति । भगवत्सायुज्यासम्भवादित्यर्थः । अत एवेति । सायुज्यासम्भवादेवं । मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिमि"ति । अधमगतिश्च मायायामन्धन्तमःप्रवेश एव । "असुर्या नाम ते लोका अन्धेन तमसा वृताः । तांस्ते प्रेत्याभि-

तत्प्राप्तिहेतुत्वेन तेषु तदभावात् । तथाच पुरुषांशबीजस्य स्त्रियां प्रवेशे तद्गृहीतस्य पुनः पुरुषाप्रवेश इव तेषां भगवति अप्रवेशः । तथाऽपि पुत्र इव तत्रापि व्यवहारो लोके वेदे च भगवदंशत्वमादायैव । एतेन प्रकृतिसम्बन्धादंशत्वमपि व्यावहारिकमिवाभूदिति निरूपितम् ।

ननु तथापि प्रकृतेस्तच्छक्तित्वेन तदभिन्नाया आनन्दरूपत्वेन तत्र प्रविष्टानामानन्द एवेति न कथं तत्प्राप्तिरितिचेन्न, भगवत एवासुरेषु स्वानन्दरूपस्य तस्यामप्रकटनात् । अत आनन्दरूपप्राकट्याभावान्न तेषामानन्दगन्धोऽपीति बुद्ध्यस्व । अन्यथा भक्तानामिवानन्दरूपदर्शने दैवेतराणामपि आनन्दानुभवः स्यात् । अतस्तद्रूपाप्राकट्यमेव तत्रेति मन्तव्यम् । अत एव, मम मायेति, राक्षसीमासुरीञ्चैवेति वाक्यद्वयबोधितसम्बन्धतदभावाभ्यामेव भगवता दैवासुरमाययोर्भेद उक्तः । मोहोऽप्युभयत्र कार्यभेदेन भिन्न एव ।

गच्छन्ति ये केचात्महनो जनाः" इति ईशोपानिषच्छ्रुतेः । निरुक्तमेव व्याख्यातवन्त आहुः । तयोरेवेत्यादि । तयोर्ज्ञानभक्त्योरेव । एवेति निश्चितम् । तत्प्राप्तिहेतुत्वे-भगवत्प्राप्तिहेतुत्वे । तेषु—असुरेषु । तदभावात् । ज्ञानभक्त्योरभावादित्यर्थः । तथाच निरूपितमित्यन्तं स्पष्टम् ।

पुनराशङ्कन्ते—

ननु तथापीति । तथापि प्रकृतिसम्बन्धेऽपि,प्रकृतेर्मायायास्तच्छक्तित्वेन तदभिन्नायाः,भगवच्छक्तित्वेन भगवदभिन्नाया इत्यर्थः । तत्प्राप्तिः भगवत्प्राप्तिरित्यर्थः । नेति निषिध्य समादधते । भगवत एवेति । तस्यामिति । मायायामित्यर्थः । अप्रकटनादिति । अप्रकटने इच्छैव कारणम् । अतः-अप्रकटनात् तेषामसुराणाम् । तत्र बाधकयुक्तिमाहुः—अन्यथेत्यादि । अन्यथा आनन्दरूपप्राकट्ये सति दैवासुरयोर्भेद एव न स्यादिति भावः । अतः—निरुक्तयुक्तेः । तद्रूपाऽप्राकट्यम्—आनन्दरूपस्याऽप्राकट्यम् । एवेति निश्चितम् । तत्र-मायायामिति मन्तव्यम् । अत्रोपष्टम्भकमाहुः अत एवेत्यादि । अत एव निरुक्तयुक्तेः सम्मतत्वादेवेत्यर्थः । "दैवी ह्येषा गुणमयी मम माया दुरत्यये"ति सप्तमाध्याये, "राक्षसीमासुरीञ्चैव प्रकृतिं मोहिनीं श्रिता" इति नवमाध्याये । सम्बन्धत-

एकत्र मोक्षार्थमपरत्र बन्धार्थमिति बोद्धव्यम् । अत एवासद्रूपत्वं तस्या इति बोधनाय क्रूरत्वार्थं राक्षसीत्वमप्युक्तम् । तेषां सहज-क्रूरत्वादित्युपाख्याने तेषु च लक्षणत्वेन दयाभावप्रतिपादनात् । अत एव विना पशुघ्नादिति श्रीभागवतेऽपि लक्षणं तेषां तदेवो-क्तम् । कार्यान्तराभावाय मोहिनीत्वमप्युक्तम् ।

ननु प्रकृतेः प्रलये भगवति लये तद्द्वारा तेषामपि लयात् परम्परया भगवत्सम्बन्धे कथं न तदानन्दानुभव इति चेन्न, प्रलये तत्संबन्धेऽपि व्यवधानेन तदानन्दाननुभवात् । अन्यथा प्रलयमुक्त्योर्भेद एव न स्यात् । प्रलयस्यैव मुक्तित्वे मुक्त्यर्थसाधना-नुष्ठानप्रयत्नवैयर्थ्यापत्तेः । न हि कोऽप्यबालिशः क्लेशेन स्वलयाय

दभावाभ्यामेवेति । मम मायेति । षष्ठ्या सम्बन्ध उक्तः । प्रकृतिं मोहिनीं श्रिता इति प्रकृतिसम्बन्धकथनेन स्वसम्बन्धाभाव उक्तः, माययोर्भेद उक्तः । बोध्यमित्यन्तं स्पष्टम् । अत एवेति । मोहस्य भिन्नत्वादेवेत्यर्थः । तस्या इति, आसुर्या इत्यर्थः । तेषां क्रूरत्वे स्वभाव एव हेतुरित्याहुः— सहजक्रूरत्वादिति । इत्युपाख्यान इति तृतीयस्कन्धे अस्मिन् स्थले सु-बोधिन्या विवरणेन तथा प्रतिपादनादित्यर्थः । अत एव—क्रूरत्वादेव । दशमस्कन्धे प्रथमाध्याये, "क उत्तमश्लोकगुणानुवादात् पुमान् विरज्येत विना पशुघ्नादि"ति भगवद्गुणानुवादे वैराग्यं आसुरो भावः । तत्र पशु-घ्नपदेन क्रूरत्वं चासुराणां लक्षणमिति भावः । अन्यदप्युपष्टम्भकमाहुः— कार्यान्तराभावायेति । मोहातिरिक्तकार्यान्तराभावायेत्यर्थः । मोहिनीत्वमिति । प्रकृतिं मोहिनीं श्रिता इति । एषा आसुरी प्रकृतिर्मोहिन्येव, नान्यकार्य-कर्त्रीति दैव्या प्रकृत्या अस्या भेदोऽप्युक्तः ।

असुराणां परम्परयाप्यानन्दानुभवो नेति वक्तुमाशङ्कन्ते—

ननिवत्यादि । नेति निषिध्य अननुभववादित्यन्तं समादधुः । अननु-भवे बाधकयुक्तिमाहुः अन्यथेत्यादि । प्रलय आनन्दानुभवे प्रलय एव मुक्तिरिति वदेयुः प्राज्ञाः, न तु प्रलय मुक्त्योर्भेदमिति भावः । अन्यदपि बाधकमाहुः । प्रलयस्यैवेति । अबालिशस्तु मुक्त्यर्थं यतते, न तु प्रल-यायेत्यर्थः । प्रलयस्य तु स्वत एव भावित्वात् प्रयत्नवैयर्थ्यापत्तिरि-त्यर्थः । तत्साधनविधायकशास्त्रवैयर्थ्यापत्तिरित्यप्यनुसन्धेयम् । न हीति । अबालिश इति । बालिशस्तुकोऽपिस्वारूढशाखाच्छेदनवद्यतत

यतेत । अतो मुक्तिर्भिन्नैव स्वरूपानन्दानुभवरूपा । प्रलयस्तु कृमीणामिवोदरवर्त्तित्वमात्रम् । स्वविषयानुभवश्च, न तावता आनन्दानुभवः । तस्य भक्तिसाध्यत्वात् । सा च भक्तिः स्नेहरूपेति तदानीं भगवद्धृदयस्थितिरेव । अत एव लक्ष्म्यादीनां तत्रैव स्थितिः अत एव, "साधवो हृदयं मह्यमि"त्यादिवाक्यानि । "जयदेवोऽपि

इति संभावना तेन पूर्वपक्षिगर्हां सूचयत्ययमपिशब्दः । अतो यत्तयोग्यायोग्यभेदान्मुक्तिः सालोक्यादिरूपा भिन्नैव । स्वरूपानन्दानुभवरूपा पुष्टिमुक्तिः । सैवास्माकमभिप्रेतेत्याशयेनाहुः । स्वरूपानन्दानुभवरूपेति । ननु प्रलयस्वरूपं किमित्याकाङ्क्षायामाहुः । प्रलयस्त्विवति । तस्येति । आनन्दानुभवस्येत्यर्थः । स्नेहरूपेतीति । स्नेहो भक्तिः । "सा पराऽनुरक्तिरि"त्यादिनिरुक्तप्रामाण्यात् । तदानीमिति । स्नेहरूपभक्तिलभ्यस्वरूपानन्दानुभवयोग्यायां मोक्षदशायामित्यर्थः । भगवद्धृदयस्थितिरेवेत्यत्रोपष्टम्भकमाहुः अत एवेत्यादि । "वक्षोनिवासमकरोत् परमं विभूतेरि"त्युक्तेः । अत्राप्युपष्टम्भकमाहुः । अत एवेत्यादि । "साधवो हृदयं मह्यं साधूनां हृदयं त्वहम् । मदन्यत् ते न जानन्ति नाऽहं तेभ्यो मनागपि" । "यथाऽधनो लब्धधने विनष्टे तच्चिन्तयाऽन्याश्रिभूतो न वेदे"त्यादीनीत्यर्थः । इदमेव स्नेहलक्षणम् । स्नेहस्य मनोधर्मत्वात्ताहशाधिकारे संपन्नानां भक्तानामपि तद्रूपत्वात्तेषां हृदयस्थितिः संभावितैव । अत्रायमर्थः । स्नेहो द्विविधः-शृङ्गाररसरूपो भक्तिरसरूपश्च । तत्रेष्टसमोहाजनितमनोविकृतिरपरिपूर्णरतिः प्रथमः । द्वितीय माहात्म्यज्ञानपूर्वकपदविशिष्टलक्षणमति भेदः । तथाच यथा रसरूपो भगवाँस्तथा भक्ता अपि द्विविधरसरूपाः व्रजभक्ता अपि द्विविधरसरूपाः व्रजभक्ता लक्ष्म्यादश्च शृङ्गाररसरूपाः, कौण्डिन्यादयोऽपि भक्तिरसरूपानारदादयः । तेषां हृदये तत्तत्स्नेहरूपो भगवाननुभावविभावसञ्चारिसात्त्विकैः परिपूर्णस्तत्तद्रसलीलां करोतीति हृदयस्थितिः । तेषां हृदयस्य भगवद्धामरूपाक्षरब्रह्मरूपत्वात् । पर्यवसानं तु शृङ्गार एवेति सूक्ष्मदृग्भिर्ज्ञेयम् । "सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति" श्रुतेः । अस्यार्थस्तु-परः पुरुषोत्तमः । "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत" इत्युक्तेः । परो मीयते दृश्यतेऽनेन इति परमः । तस्मिन् परमे व्योमन् व्योमनि । विभक्तिलोपश्छान्दसः । गुहायां व्यापिवैकुण्ठात्मके हृदयाकाशे, सत्यं ज्ञानमनन्तं धर्मविशिष्टं

राधामाधाय हृदय” इत्युक्तवान्। अतः प्रलये निद्रायामिवानेकजन्मक्लेशापाय एवेति सर्वं सुस्थम् ।

निजाचार्यानुकम्पातः संशयोऽयं निराकृतः ॥
हरिदासेन तुष्यन्तु तेन ते स्वामिनो मम ॥ १ ॥

इति श्रीमद्वल्लभाचार्यान्वयगोस्वामिश्रीमद्धरिरायजिद्विरचितो ब्रह्मवादः समाप्तिमसेधत् ॥

ब्रह्म यो वेद सः, विपश्चिता रसलीलानिपुणेन ब्रह्मणा पूर्णपुरुषोत्तमेन रसरूपेण सह सर्वान् कामान् रसमनोरथानश्नुते भुङ्क्ते इत्यर्थः । एत दानन्दमयाधिकरणे विशदीकृतं श्रीमदाचार्यचरणैरिति दिक् । एवञ्च भगवतो भक्ताभिलाषया भक्ता अपि भगवद्हृदये स्थिता इति बोध्यम् । नच पूर्णस्य भगवतोऽभिलाषाभाव इति वाच्यम् । उभयाभिलाषाभावे रसमर्यादाभङ्गप्रसङ्गात् । नचाभिलाषायां पूर्णत्वक्षतिरिति वाच्यम् । “रसो वै स” इति श्रुत्या स्वस्य रसरूपत्वेन रसलीलाकरणस्येष्टत्वेनाभिलाषाया अपीष्टत्वात् । भक्तानामपि स्वस्वरूपत्वेनातिप्रियत्वेन चाभेदादक्षतेः । महतोऽवरेऽन्यस्मिन्नभिलाषायां क्षतिदर्शनात् । परस्पराभिलाषायां तु अन्योन्यमनोरथपूणार्थमेवाभिलाषा, न तु वस्तुसापेक्षतयेति रसपूरणार्थैव सा । अतो न पूर्णत्वक्षतिशङ्काऽपि । “ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमि”त्युक्तेः सर्वमनवद्यम्। हृदयस्थितौ जयदेवोक्तमपि प्रमाणमाहुः राधामाधायेति । गीतगोविन्द शृङ्गाररसवर्णनप्रबन्धे, “राधामाधाय हृदये तत्याज व्रजसुन्दरीरि”त्युक्तवाञ्जयदेवः। उपसंहरन्त आहुः तत इति । अतः पूर्वोक्तयुक्त्या क्लेशोपाय एव, न तु मुक्तिवदानन्दानुभव इति भावः ।

समाप्तिं दर्शयितुमाहुः निजाचार्यानुकम्पात इति । निजाश्च ते आचार्याश्च तेषामनुकम्पा कृपा दयापरपर्यायरूपा। निरुपाधिपरदुःखप्रहाणेच्छा च दया । तथा संशयनिराकरणे बुद्ध्यादिपरिश्रमरूपो यो दुःखस्तत्प्रहाणेच्छारूपेत्यर्थ इति प्रकृतोपयोग्यर्थः। वस्तुतस्तु कृपायाः सामर्थ्यं महत् “मूकं करोति वाचालमि”त्यादि । तथाच संशयनिराकरणमनायासेन सूचितम् । हरिदासेनेति । हरेर्दासः सर्वदुःखहेतुर्भगवतो दासेनाऽपि संशयनिराकरणरूपं दुःखहरणं युक्तमिति भावः । “संशयात्मा विनश्यती”त्युक्तेस्तस्य दुःखरूपत्वेन तन्निराकरणेऽनेन मोक्षोऽपीति हरिदासाः परम-

कृपालवो भवन्तीति सूचितम् । यतो हरिस्वभावा एव हरिदासाः । "स्वयं समुत्तीर्य सुदुस्तरं द्युमन् भवार्णवं भीममदभ्रसाहृदाः । भवत्पदाम्भोरुहनावमत्र ते निधाय याताः सदनुग्रहो भवानि"त्युक्तेः । यद्वा हरिरेव दासः । "नोद्धवोऽण्वपि मन्न्यूनो यद्गुणैर्नार्दितः प्रभुः नाहमात्मानमाशास" इत्याद्युक्तेः । हरेर्विना संशयनिराकरणसामर्थ्यासम्भवाद्धरिरेव दास इत्यपि सुवचम् । हरिवद्दास इति वा । स्वामिनो ममेति । अत्र स्वस्वामिभावसम्बन्धेन सेव्यसेवकभाव उक्तः । "आचार्यं मां विजनायादि"त्युक्ते"हर्याचार्ययोरभेदात् । अन्यथा, हरिदास इति विरुद्धं स्यात् । पतिद्वयापत्तौ व्यभिचारापातात् । तेन संशयनिराकरणेन ते आचार्यरूपाः प्रभुचरणास्तुष्यन्तु प्रसन्ना भवन्तु । प्रसादकारणीभूतत्वात्तुष्टेर्न काप्यन्यफलापेक्षेति भाव इति । अनेन पुष्टिः सूचिता ।

इति श्रुतिशताशयात्प्रभुवरैः सुसिद्धान्तिता-
न्मितादखिलबोधनाय हि मितः समुद्ग्रन्थितः ।
मया सुविशदीकृतो रसिकरायगूढाशयः
समाप्तिमगमच्छुभो य इह तैः सुसिद्धान्तितः ॥ १ ॥

शश्वत्प्रसादसुमुखः सकलः कलेशो
नन्दगृहाभरणभूरभवद्विभूत्यै ।
स श्रीमनोजनितमोहनसंज्ञयाऽऽसी-
न्ममूर्ध्नि गोपवरहृत्कमलप्रभावात् ॥ २ ॥

तेषु प्रसादसुमुखेषु किमप्यलभ्यं
नास्त्यत्र सत्सु भगवत्सु यतो हि यस्याम् ।
सौगन्ध्यहीनमपि युक्तमभूत् सुपुष्पं
विद्वद्भिहृङ्गविरतिस्तु कदाऽपि न स्यात् ॥ ३ ॥

इति श्रीमन्निरस्तपरमततिमिरनिकरविकासितमुरारिचरणसरसीरुहश्रीपुरुषोत्तमात्मप्रतिमूर्त्तिश्रीवल्लभविठ्ठलाचार्यान्वयश्रीमद्गोपेश्वराचार्यचरणपद्मपरिचरणप्राप्तमकरन्दमिलिन्दायमानेनानुचरेण गोष्ठीशालोपनामकेन गोपालकृष्णेन विरचितं श्रीमद्धरिरायकृतब्रह्मवादविवरणं समाप्तिमफाणीत् ॥

श्री हरिः ।

श्रीकृष्णाय नमः ॥

श्रीमदखण्डभूमण्डलाचार्यमहाप्रभुश्रीवल्लभाचार्यान्वयजगोस्वामि-
श्रीव्रजनाथविरचितो

ब्रह्मवादः

विशेषैः प्राकृतैः शून्यमप्राकृतविशेषवत् ।
अशेषोपनिषद्वेद्यं परं ब्रह्म वयं स्तुमः ॥ १ ॥

ननु कथमयमपूर्वः प्रस्तावः, ननु कथमस्यापूर्वत्वं 'निखिलप्रमाणसिद्धत्वादिति चेत्, न, सर्वागमविरुद्धत्वात्, तथाहि "सर्वं खल्विदं ब्रह्म तज्जलानिति" "अहं बहुस्याम्" "सहैतावानास" "अहं सर्वस्य जगतः प्रभवः प्रलयस्तथा" "जन्माद्यस्य यतः शास्त्रयोनित्वात्" इत्यादि श्रुतिस्मृतिसूत्रैः सर्वस्यापि जगतो ब्रह्मात्मकत्वेवधारिते तदन्तःपातिनामपि तेषां तत्त्वमेवेति कथं विशेषाणां प्राकृतत्वम् ? कथं वा तन्निषेध इति चेत्, सत्यम्, "स एकाकी न रमते" "सद्वितीयमैच्छत्" "अहं बहुस्याम्" इतिश्रुत्येकवाक्यतायां रमणार्थमेवं नामरूपवैचित्र्येण स्वाविर्भावेच्छां कृतवानित्यर्थो लभ्यते । वैचित्र्यं चोच्चावचत्वकृतम्, तच्च न्यूनाधिकांशमन्तरा नसम्भवतीत्यनन्तशक्तित्वात् सच्चिदानन्दांशानेव यथानुरूप्येण तिरोभाव्य जडजीवान्तर्यामिरूपेण स्वयं प्रादुर्भूतः "यथा सुदीप्तात्पावकात्(१)" इति मुण्डकश्रुतेः । आविर्भावस्तु विद्यमानस्य वस्तुनोऽनुभवविषयतायोग्यत्वम्, तदयोग्यत्वं च तिरोभावः । अत्रानुभवस्तु जैवो ब्राह्मः, जीवान्तर्यामिसाधारणोवा । तत्र तिरोहितचिदानन्दत्वेजडत्वम् । तिरोहितानन्दत्वे जीवत्वम् । प्रतिबिम्बत्वादिरूपमपीदमेव ज्ञेयम् । आविर्भूतानन्दत्वे ब्रह्मत्वम् । तदेतदुक्तम् "आभासप्रतिबिम्बत्वमेवं तस्य" इत्यादिनाऽऽचार्यचरणैर्निबन्धे । अतिरोहितसच्चिदानन्दांशत्रयत्वमन्तर्यामित्वमिति । एवमेव भगशब्दवाच्यानामैश्वर्यादिषण्णामपि *धर्माणां तिरोभावमविद्यासम्बन्धेन जीवेकृतवान् । तथैव बन्धो जन्ममरणदेशादिरागरूपं विपरीतज्ञानञ्चाविद्ययैव । "बन्धो-

---

(१) यथेत्यारभ्यश्रुतेरित्यन्तम्र पं० रमानाथभट्ट सम्पादितपुस्तके न दृश्यते ।

(*) ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चापि षण्णां भग इतीरणा ॥

स्याविद्यये"ति वाक्यात् जीवस्यैव । नान्ययोः प्रयोजनाभावात् । "पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ" इति वैयाससूत्रादपि तथा। जडे तु चित्तिरोभावादेवैश्वर्यादीनामपि तथा, चेतनधर्मत्वात्तेषाम्; तथा चैतादृशस्य जीवस्याविद्यकं ब्रह्मस्वरूपे तद्धर्मेषु च विपरीतज्ञानं भवति। तच्च जडजीवरूपे ब्रह्मण्यब्रह्मत्वेन ज्ञानम् । इदमेव स्वरूपाज्ञानम् । सत्यत्वाद्यनेकालौकिकधर्मेषु चासत्यत्वविकारित्वाद्यनेकलौकिकत्वेन ज्ञानम् । एवं च, सत्यविद्यासम्बन्धेन विषयीकृता लौकिका ये जडजीवधर्मास्त एव प्राकृतविशेषाः, तेषामनाश्रयत्वात्तैः शून्यमित्यर्थः । प्रकृतिसम्बन्ध सहकृतेन्द्रियज्ञानाविषत्वम् प्राकृतत्वमिति लक्षणं सिद्धम्।

प्रमाणं चात्र निषेधिका एव श्रुतयः । अयं च बाधोऽप्राप्तबाधस्तार्तीयः(१)नाप्यदाशमिको न्यायः(२)। एतेन निषेधश्रुतयोऽपि निषे(३)धविषयाप्राकृताविशेषा इति विषयप्रदर्शनमुखेन व्यख्याता ज्ञेयाः । यद्यप्येतादृशनिषेधेनैव वक्ष्यमाणार्थसिद्धिस्तथापि विशेषत्वावच्छिन्नस्य प्राकृतत्वात्तदितरधर्माणां चाप्रसिद्धेर्विधायकश्रुतेश्चान्यपरत्वान्निर्विशेषमेव ब्रह्मसिद्ध्यतीति मतान्यरव्युदस्तये विशेषणान्तरमाह—अप्राकृतेति ।न प्राकृता अप्राकृताः प्रकृतिसम्बन्ध(४)सहकृतेन्द्रियाविषयाः। इहग्विशेषवदित्यर्थः। प्रमाणं चात्र पूर्वोदाहृतश्रुत्याद्याकलनीयम्।

(५)ननु पूर्वोदाहृतश्रुत्याद्युदाहृतधर्माणामपि मायिकत्वात् कथं तथात्वमिति चेत्, मैवम्, तेषां (६)मायिकत्वे प्रमाणाभावात् । ननु निषेधश्रुत्यनुरोधात्तथाकल्प्यते, न तद्युक्तम, निषेधश्रुतेः प्राकृतविषयवत्वात्; अन्यथा पाणिपादादादिमत्वं निषिध्य 'जवन' इत्यादिना "परास्य शक्तिरि"त्यादिना च क्रियाज्ञानविधानवैयर्थ्यापत्तेः ।

नन्वन्तःकरणशुद्धिहेतूपासनार्थत्वात्तेषां न वैयर्थ्यम्, अपाणी-

---

(१) तार्तीयोबाधः अप्राप्तबाधइत्यर्थः। सच दुर्बलप्रमाणबोधितस्य प्रबलप्रमाणेन बाधरूपः। विशेषस्तु पूर्वमीमांसायां तृतीयाध्याये तृतीयपादे सप्तमाधिकरणे द्रष्टव्यः।

(२) दाशमिकेति दाशमिकोदशमाध्यायस्थः प्राप्तबाधइत्यर्थः । स चपूर्वमीमांसायां दशमाध्याये प्रथमपादे प्रसिद्धः।

(३) निषेधविषयाः प्राकृतविशेषविषयप्रदर्शनेनेति पं० रमानाथभट्ट सम्पादितपुस्तकपाठ ।

(४) सहितेत्यपिपाठः।

(५) ननु पूर्वोदाहृतेति नास्ति(ग)पुस्तके।

(६) समायिकत्व इति पं० रमानाथभट्टानां पाठः।

त्याद्युक्तनिर्विशेषस्य ध्यातुमशक्यत्वात् । उपासनार्थमलौकिकानामेव तेषां विधानमिति चेत्, न, लोकप्रसिद्धत्वेन तेषां लौकिकत्वात् इति चेत्, नैवम्,पादादिसाधनरहितजवनादिक्रियाया अलौकिकत्वादेव स्वरूपज्ञानार्थं निर्धर्मकत्वविधानम्, उपास्त्यर्थं तु धर्मविधानमिति-वाक्यभेदापत्तेः । भ्रान्तिप्रतिपन्नविषयवैशिष्ट्येनोपासनया तच्छुद्धेरेवाजननाच्च । "अन्यथासन्त"मित्यादिनिन्दाश्रुतेः ।

नचासतोऽपि वैशिष्ट्यज्ञानं शाखाचन्द्रन्यायेन स्वरूपावगतिसाधनमिति नैतद्दोषावसर इति वाच्यम्, दृष्टान्त वैषम्यात् । नहि (१)शाखावद्ब्रह्म प्रत्यक्षम्, यस्मिंश्चन्द्र इव धर्मा आरोप्यन्ते । नापि पाणिपादादिराहित्येऽपि जवनगृहीतृत्वादयो धर्माः क्वचित्प्रत्यक्षाः, तथा चाधिष्ठानाधिष्ठेययोरुभयोरप्यप्रत्यक्षत्वान्नदृष्टान्तबलेनतत्सिद्धिः । एतेनैवाकाशदृष्टान्तोऽपि निरस्तः । किञ्च आरोपो ह्यन्यधर्मस्यान्यत्रस्थापनम् । इत्थं च सति स्वनिरूप्यधर्माणां लोकाप्रसिद्धतयाऽन्यदीयत्वाभावादारोपलक्षणासङ्गतेर्नारोपोऽपि वक्तुं शक्यः । अत एव न निषेधविषयत्वमपि तेषाम्, प्रतीतस्यैव निषेधात् । नच लोकेऽस्मदृगविषयत्वेऽपि श्रुतिदृष्टिगोचरत्वेनारोपनिषेधौ नानुपपन्नाविति वाच्यम्, लोके मूर्तामूर्तविलक्षणरूपसत्त्वे "द्वे वावे"ति श्रुतिविरोधात् । नचेदमस्मज्ज्ञानानुवाद इति वाच्यम्, तथापि तयोरनुपपत्तेः । ननु कथमिति चेदित्थम्, श्रुतिर्हि दोषदुष्टदृष्ट्या किं तान्विषयीकरोति शुक्तिरजतवत्, किंवा गुणदृष्ट्या, रजते रजतत्ववत् ? नाद्यः रजतवदन्यत्रादर्शनात्, तद्भ्रमानुपपत्तेः । नचास्मदादिवत्तासामविद्यवशाद्विपरीतज्ञानम्, जीववत्तासामविद्यासम्बन्धानुक्तेः । द्वितीये, तन्निषेधानुपपत्तेः । ब्रह्मणः सदैकरसत्वाभावस्थाभेदः । किञ्चोपसनार्थमसदुपदेशे प्रतारकत्वापत्तेः । उपासनार्थत्वे तु तेषां सर्वतः पाणिपादत्वादिधर्माणां ब्रह्मवदलौकिकत्वेन मनसाप्याकलयितुमशक्यत्वेन तद्वत्त्वेन तदुपासनाया एवासिद्धेस्तन्निरूपणानर्थक्यापत्तेश्च निराकारोपासनवत्साकारोपासनस्याप्यशक्यतया भक्षितेऽपि लशुने न शान्तो व्याधिरिति दोषतावस्थ्याच्च ।

ननूपासनायां हि वैशिष्ट्यज्ञानमपेक्षितम् तच्च नद्याः कच्छे गावश्चरन्तीतिवत्, सौन्दर्यस्य तरङ्गिणीत्यादिवद्वा, तद्विषयकं श्रौतं शाब्दम-

---

(१) शाखावदित्यत्र शाब्दमिति प० रमानाथभट्टानां पाठः, सच स्पष्टमेव प्रामादिकः शाब्दब्रह्मण प्रकृतानुपयोगादिति ध्येयम् ।

स्त्येव, तेनैव च निराकांक्षा सा न तत्साक्षात्कार(१)मपेक्षत इति नानर्थ क्यमिति चेन्नैतद्युक्तम् । तथाहि–उपासना हि किमिच्छा, क्रिया, (२)ज्ञानविशेषो वा ? तत्र नाद्यः सा किं तावद्धर्मविशिष्टस्य दर्शनेच्छा, तत्प्राप्तीच्छा वा, तज्जिज्ञासा वा ? तिसृणामपि वस्तु(३)तो निर्गुणत्वात् तस्य त्वन्मतेऽसम्भवात् । नद्वितीयः, सापि किं तदुद्देश्यिका होमदानादिरूपाक्रिया किं वा द्रव्याद्युपचारैस्तदर्चनादिरूपा ? आद्ये तादृशविधेरेवासम्भवान्न सा, द्वितीयेऽनिर्देश्ये तदसम्भवान्नतद्रूपापि सा । तृतीये तु मननरूपं तद्वक्तव्यम्, तथा सति निर्गुणस्यापि मननाद्वद्वैशिष्ट्यज्ञानमाकिञ्चित्करमेव, नियमेन तत्करणत्वाभावात् । ननु नाकिञ्चित्करत्वम्, बुद्धिस्थैर्यद्वारा निर्गुणमननार्थमेव तन्मननाङ्गीकारादिति चेत्, न, सविशेषमननवन्निर्विशेषमननेऽपि तत्प्रतिपादकवाक्यार्थबोधातिरिक्तसाधनान्तरानपेक्षणात् । दृश्यतेऽपि चेदानींतनपारिव्राजकेषु विनैपोपासनां तत एव मननम् ।

अथ मायाजन्यत्वमेव मायिकत्वमिति चेत्, तत्र ब्रूमः । मायायाः समवायित्वमसमवायित्वं (नि ४)मित्तत्वं) वा ? नाद्यः मायाधर्मत्वापत्तेः, समवेतानां समवायिधर्मवत्वात् । न द्वितयिः, समवायिकारणे ब्रह्मणि कार्यैकार्थकारणैकार्थप्रत्यासत्योरभावात् । तृतीये तु दण्डचक्रादिवत्तत्वे ब्रह्मणि वस्तुतस्तादृशधर्मसिद्ध्यानिर्विशेषासिद्धेः । किञ्च दण्डादिवन्मायाया अपि कर्तृप्रयोज्यत्वनियमेन कर्तुः प्रयोजकत्वस्यावश्यं वाच्यत्वेन तस्य च मायासम्बन्धात्पूर्वमपि सत्वावश्यकत्वाद्धर्माणां मायिकत्वासिद्धेश्च ।

अथोपरागस्तानवज्जन्यताऽस्तु, तत्राप्युच्यते, तदा सा माया नित्योतकादाचित्की ? नित्यत्वेऽद्वैतहानिः, धर्माणां च तन्नित्यत्वेन नित्यत्वापत्त्या निषेधानुपपत्तिश्च । कादाचित्कत्वे तु तस्याः सनिमित्तत्वात्तदभावे न तत्र तद्वक्तुं शक्यम् ।

नन्वस्तु प्रागभाववदनादिसान्तत्वपक्षस्तृतीय इति चेत, न, अनादित्वे प्रमाणाभावात् । ननु सादित्वस्यादृष्टत्वादेवानादित्वमनुक्तसिद्धमेव

(१) अपेक्षितमितीति पाठः (क) पुस्तके ।

(२) ज्ञानं, तद्भिन्नो वेति पाठमादृत्य विकल्पचतुष्टयं पं० रमानाथशास्त्रिभि· प्रदर्शितम्, परमग्रिमग्रन्थाविवेचणात्तदसमञ्जसमिति सुधीभिराकलनीयम् ।

(३) वस्तुन इति (क) पुस्तके ।

(४) कुण्डलित· पाठः कुत्राप्यादर्शपुस्तके न दृश्यते; परत्वग्रिमविकल्पत्रयसमाधनानुरोधेनास्माभिर्निवेशित इतिध्येयम् ।

"बन्धोऽस्याविद्यया" इति वाक्याच्च तथा, इति चेत्, सत्यम्, यद्यप्यस्मदादिदृष्टं न सादित्वं तथापि नानादित्वम्, तत्त्वे ब्रह्मतुल्यतापत्तेः, तथापि "न तत्सम" इति श्रुतिविरोधः "सदेवे"त्यादिश्रुतिविरोधश्च। ननु सान्तत्वान्नतत्तौल्यम्, न सर्वथाऽनादिसिद्धस्य सान्तत्वाभावात्, ब्रह्मवत्। जन्यस्यैव भावस्य सान्तत्वनियमात्। ननूक्तः प्रागभावदृष्टान्तः, नचैतद्युक्तम्, उक्तनियमानङ्गीकारे त्वेतद्दृष्टान्त(१)बलेनात्मनोऽपि सान्तत्वापत्तेः। दृष्टान्तस्याप्यसिद्धेः।

नन्विह कपाले घटो भविष्यतीति प्रतीत्यन्यथानुपपत्तिसिद्धः स इति चेत्, नैवम्, भविष्यत्कालावच्छिन्नघटसत्ताविषयत्वात्तत्प्रतीतेः। स्यादेतत्, 'इह कपाले नेदानीं घट' इतिप्रत्ययबलात् तत्सिद्धिरिति। न ह्ययमत्यन्ताभावं ध्वंसं वावगाहते, पूर्वस्य नित्यत्वात्, द्वितीयस्य केनाप्यकरणात्, अतः परिशेषात्तत्सिद्धिरिति चेत्, न, तिरोभावावगाहित्वात् तत्प्रत्ययस्य। न हि तिरोभावः प्रागभावः, ध्वंसेऽपि तथा प्रतीतेः। ननु कस्तर्ह्ययं तिरोभावः? अत्र ब्रूमः, विद्यमानस्य वस्तुनो दर्शनायोग्यत्वं तत्, तच्च भगवदैच्छिकम्। नन्वीश्वरेच्छाया नित्यत्वात्तन्नित्यतापत्तिरिति चेत्, न, सिसृक्षासञ्जिहीर्षयोर्नित्यत्वात्तयोरपि नित्यत्वापत्तेः। नन्विष्टापत्तिः, तयोरुभयोर्नित्यानुवृत्तेरिति चेत्, नैवम्, तयोरेकवस्तुविषयत्वेन तत्सर्गप्रलययोर्नित्यत्वापत्त्या तयोरन्यतरस्याप्यशक्यनिरूपणापत्तेः, अथवा नेदानीं घट इति प्रत्ययोऽत्यन्ताभावविषयोऽस्तु। न चेदानीमित्यस्यानुपपत्तिः, तस्य नित्यत्वादिति वाच्यम्, त्वन्मतीयप्रागभावस्यापि तदानीमुत्पत्त्यभावेन तदनुपपत्तेस्तौल्यात्, अनादित्वभङ्गप्रसङ्गाच्च। ध्वंसेऽपसरणे च तथाप्रतीतेश्च।

ननु तर्हि घटोत्पत्तावपि तादृगभावप्रत्ययापत्तिरिति, तन्न, घटवत्ताबुद्धेः प्रतिबन्धकत्वात्। किञ्च घटात्यन्ताभावस्य घटत्वावच्छेदकत्वावच्छिन्नप्रतियोगिताकत्वादेतद्घटात्यन्ताभावस्य तत्रापि सत्वात्, तद्विषयकत्वेनैव तादृशप्रतीत्युपपत्तेर्न तदनुरोधेनातिरिक्ताभावकल्पना युक्ता, गौरवात्।

ननु तर्हि तादृशाभावस्य नित्यत्वाद्घटानुत्पत्तिप्रसङ्ग इति घटान्तरीयात्यन्ताभाव एव। नत्वेतत्, घटात्यन्ताभावस्तत्रेति तस्यैव परिशेषात्सिद्धिः। फलमुखगौरवस्यादुष्टत्वात्। नच तद्वत्ताबुद्धेस्तदभाववत्ताबुद्धिप्रतिबन्धकत्वात्तन्निर्वाह इति वाच्यम्। नात्र प्रतीतिमात्रस्यैव वि-

(१) उक्तनियमेत्याद्यारभ्य दृष्टान्तेत्यन्तः पाठः पं० रमानाथ भट्टानां पुस्तके तिरोहितः।

स्वारः, किन्तूत्पत्तेरपि । एवं सति नित्यं प्रतिबन्धकस्य सत्वेन तदुत्पत्ते-रेव वक्तुमशक्यत्वेन तद्वत्ताबुद्धेरेवानुदयात्, अन्यथा वायौ रूपाद्यु-त्पत्तिप्रसङ्गात्, इति चेत, न, घटत्वसामानाधिकरण्येन तत्र तदभाव-ग्रहणे घटत्वावच्छेदकावच्छिन्नानां सर्वेषां कार्यत्वेनैवोत्पत्तिमत्तया तद-भावस्य त्रैकालिकत्वासिद्धेस्तदत्यन्ताभावासिद्धिप्रसङ्गात् ।

स्यादेतत्, पूर्वं घटाभावद्भूतलमिति बुद्धिस्तत्र च घट आनीते घटवद्भूतलमिति बुद्धिस्तत्र न तदभावबुद्धिः, तद्बुद्धिप्रतिबध्यत्वात्; तथाच प्रतिबध्यबुद्ध्यन्यथानुपपत्त्यैव तत्सिद्धिर्ध्वंस्त इति बुद्ध्यभा-वान्नध्वंसो विषयः । सत्यम्, किं तत्र तत्सामानाधिकरण्येन तदभाव ग्रहः किं वा तदवच्छेदेन ? आद्ये यत्किञ्चिद्घटवत्ताबुद्धिप्रसङ्गः । द्वितीय-श्चेत् सर्वत्रापि स एवास्तु, कृतं तत्सामानाधिकरण्येन तदभावप्रयासेन । नच तस्य तत्प्रतिबन्धकत्वम् घटरूपेणाविर्भावेच्छायामभावग्रहणरूपस्य तिरोधानात्सर्वस्यैव व्यवह्रियमाणत्वात्सर्वव्यवहारार्थमेव तत्प्राकट्यात् । नचैवं विद्वदाभरणेऽनित्यत्वलक्षणेऽसम्भवो दोषः स्यात्, तत्रोभयोस्त-योस्त्वद्रीत्यैव निरूपणेनापि दोषप्रदर्शनात्, वस्तुतोऽभावप्रतियोगित्वं तत्त्वम्, इत्यत्रैव तात्पर्यात्, नचैवं ब्रह्मणोऽनित्यत्वप्रसङ्गस्तयो का-र्यधर्मत्वात् ।

प्रकृतमनुसरामः । तथाच धर्माणां मायिकत्वाभावात्सिद्धमप्राकृत-धर्मत्वं ब्रह्मणः । अत्रैव हेतुगर्भविशेषणमाह—अशेषोपनिषद्वेद्यमिति । न विद्यते विशेषो यासु ताः, ततः कर्मधारयः, ततस्तत्पुरुषः । सर्वोपनिष-त्प्रतिपाद्यमित्यर्थः । अस्य तत्त्वन्त्वित्थं बोध्यम्—तथाहि—यदि धर्माः प्राकृताः स्युस्तर्हि तद्विशिष्टं ब्रह्मभवेत्, तथासति तत्प्रतिपादकवेदा-न्तानामब्रह्मपरत्वे "सर्वे वेदा यत्पदम्" इत्यादिवाक्यानि व्याकुप्येरन् । औपनिषदत्वमपि साधारणं स्यात्, अत ईदृशवाक्यान्यथानुपपत्तिरेव विशेषाणामप्राकृतत्वं साधयतीति सुधीभिरवसेयम् ।

अथेयं न दूषणसङ्गतिः, अतात्त्विकभेदोररीकरणात्, नैवं वक्तुं युक्तम, तथाहि—अतात्त्विकत्वं ह्यौपाधिकत्वमायुष्मता वाच्यम्, तत्रो-पाधिर्माययैव (तथा,) तत्र सा किं सर्वं ब्रह्मव्याप्नोत्युतैकदेशम् ? आद्ये-ऽभिव्याप्तेरेवासम्भवः । परिच्छिन्नएव तत्सम्भवात् । उत्तरे सांशत्वा-पत्तिः, "असङ्गोह्ययमि"त्यादि विरोधश्च ।

ननु घटावच्छिन्न आकाश इत्याकाशवन्मायावच्छिन्नत्वेऽपि न सांशत्वापत्तिरिति चेत्, नैवम्, वैलक्षण्येन तस्य दृष्टान्तत्वासिद्धेः, तस्य कार्यत्वेन सांशत्वात् । नच सांशत्वे ग्राह्यतापत्तिः, वायुवद्ग्राह्य-

त्वात् (न सा)। ननु क्वचिद्द्वयोरपि ग्राह्यत्वं निरूप्यत इति चेत्, न, द्व्यणुकस्य ग्राह्यतापत्तेः। अयोग्यत्वान्नतद्ग्रह इति चेदत्रापि तथा। महत्वाभावनिबन्धनं हि तत्रायोग्यत्वम्। अत्रापि स्पर्शाभावनिबन्धनं समः समाधिः।

नच सांशत्वे तन्नाशापत्तिरिति वाच्यम्। इष्टापत्तेः। अन्यत्वावच्छेदकं हि व्यवच्छेदकम्, यथा घटत्वं पटाद्व्यवच्छेदकम्। तथात्रापि घटाद्युपाधिरूपमवच्छेदकं महाकाशादंशिनः स्वानुरूपं स्वस्पाकाशरूपमंशं परिच्छिनत्तीति घटावच्छिन्न आकाश इति प्रत्यय (स्तु) उपपन्नः। ब्रह्मणि तु तथा वक्तुमशक्यत्वात्कथं मायावच्छिन्नतेत्यवधार्यम्।

किञ्च ब्रह्ममाययोः कः सम्बन्धः? नतावत्संयोगः। अत्र(१) संयोगनिषेधात्, संयोगलक्षणाभावाच्च। तयोरन्यतरास्थितेरनाश्रितत्वादुभयोर्नसमवायः। नापि स्वरूपलक्षणः, विशेषणविशेष्यादिभावाभावेन तस्य वक्तुमशक्यत्वात्। नन्वस्त्येव विशेषणविशेष्यभावोदोषाभावात्। नैवं शक्यं वक्तुम्। तथा भावे ब्रह्मणः सधर्मकत्वापत्तेरेव दोषत्वात्।

अथ कर्तृत्वादिधर्मवद्विशेष्यत्वमपि मायिकम् इति न तदापत्तिर्वास्तवत्वाभावात्। तथाहि—तत्र मायिकत्वं मायाजन्यत्वं मायासम्बन्धेन प्रतीयमानत्वं वा ? आद्ये ब्रह्मणः सधर्मकत्वापत्तिः, सदैकरसत्वव्याघातश्च। द्वितीयेऽसङ्गश्रुतिविरोधः।

ननु न ब्रह्मणि मायासम्बन्धं ब्रूमोऽपि तु जीवे। तथाच जीवनिष्ठया तया दोषरूपया विचित्रा धर्माः प्रत्याय्यन्ते, आरक्ताद्युपनेत्रवत्, इति चेत्, न, जीवस्य ब्रह्माभिन्नत्वेन तथा वक्तुमशक्यत्वात्, तादृशोपनेत्रवन्मायायास्तद्धर्मत्वापत्तेश्च। तथाच मायासम्बन्धस्य वक्तुमशक्यत्वेनौपाधिकभेदासम्भवादप्राकृतानेकधर्मवत्तया सर्वोपनिषद्वेद्यत्वं सिद्धम् ब्रह्मण इति दिक्।

उक्तविशेषणविशिष्टं वस्तु विशेष्यत्वेन निर्दिशति परमिति। सामान्येन परत्वस्येन्द्रियादिष्वपि "इन्द्रियाणिपराण्याहुः" इति वाक्येनोक्तत्वात् ब्रह्मेति। सर्वेभ्यो यत्परं ब्रह्म तदित्यर्थः। नच ब्रह्मत्वेनैव परत्वे प्राप्ते परपदानर्थक्यमिति वाच्यम्, इन्द्रियादिपरत्वस्य ज्ञेये ब्रह्मण्यपि सत्वात्ततोऽपि परत्वेन सार्थक्यात्। ननु "महतः परमव्यक्तमव्यक्तात्पुरुषः परः, पुरुषान्नपरं किञ्चित् सा काष्ठा सा परा गतिः" इति श्रुत्या "इन्द्रियाणि पराण्याहु" रिति स्मृत्या च ब्रह्मणोऽन्यस्य परत्वाभावात् कथं

---

(१) अजसंयोग इति पं० रमानाथभट्टानां पुस्तके पाठः स चातीव प्रामाणिक इति प्रतिभाति।

त्वात् (न सा)। ननु क्वचिद्वायोरपि ग्राह्यत्वं निरूप्यत इति चेत्, न, द्व्यणुकस्य ग्राह्यतापत्तेः। अयोग्यत्वान्नतद्ग्रह इति चेदत्रापि तथा। महत्त्वाभावनिबन्धनं हि तत्रायोग्यत्वम्। अत्रापि स्पर्शाभावनिबन्धनं समः समाधिः।

नच सांशत्वे तन्नाशापत्तिरिति वाच्यम्। इष्टापत्तेः। अन्यच्चावच्छेदकं हि व्यवच्छेदकम्, यथा घटत्वं पटाद्यवच्छेदकम्। तथात्रापि घटाद्युपाधिरूपमवच्छेदकं महाकाशादंशिनः स्वानुरूपं स्वरूपाकाशरूपमंशं परिच्छिनत्तीति घटावच्छिन्न आकाश इति प्रत्यय (स्तु) उपपन्नः। ब्रह्मणि तु तथा वक्तुमशक्यत्वात्कथं मायावच्छिन्नतेत्यवधार्यम्।

किञ्च ब्रह्ममाययोः कः सम्बन्धः? नतावत्संयोगः। अत्र(१) संयोगनिषेधात्, संयोगलक्षणाभावाच्च। तयोरन्यतरास्थितेरनाश्रितत्वादुभयोर्नसमवायः। नापि स्वरूपलक्षणः, विशेषणविशेष्यादिभावाभावेन तस्य वक्तुमशक्यत्वात्। नन्वस्त्येव विशेषणविशेष्यभावोदोषाभावात्। नैवं शक्यं वक्तुम्। तथा भावे ब्रह्मणः सधर्मकत्वापत्तेरेव दोषत्वात्।

अथ कर्तृत्वादिधर्मवद्विशेष्यत्वमपि मायिकम् इति न तदापत्तिर्वास्तवत्वाभावात्। तथाहि—तत्र मायिकत्वं मायाजन्यत्वं मायासम्बन्धेन प्रतीयमानत्वं वा? आद्ये ब्रह्मणः सधर्मकत्वापत्तिः, सदैकरसत्वव्याघातश्च। द्वितीयेऽसङ्गश्रुतिविरोधः।

ननु न ब्रह्मणि मायासम्बन्धं ब्रूमोऽपि तु जीवे। तथाच जीवनिष्ठया तया दोषरूपया विचित्रा धर्माः प्रत्याय्यन्ते, आरक्ताद्युपनेत्रवत्, इति चेत्, न, जीवस्य ब्रह्माभिन्नत्वेन तथा वक्तुमशक्यत्वात्, तादृशोपनेत्रवन्मायायास्तद्धर्मत्वापत्तेश्च। तथाच मायासम्बन्धस्य वक्तुमशक्यत्वेनौपाधिकभेदासम्भवादप्राकृतानेकधर्मवत्तया सर्वोपनिषद्वेद्यत्वं सिद्धम् ब्रह्मण इति दिक्।

उक्तविशेषणविशिष्टं वस्तु विशेष्यत्वेन निर्दिशति परमिति। सामान्येन परत्वस्येन्द्रियादिष्वपि "इन्द्रियाणिपराण्याहुः" इति वाक्येनोक्तत्वात् ब्रह्मेति। सर्वेभ्यो यत्परं ब्रह्म तदित्यर्थः। नच ब्रह्मत्वेनैव परत्वे प्राप्ते परपदानर्थक्यमिति वाच्यम्, इन्द्रियादिपरत्वस्य द्वये ब्रह्मण्यपि सत्वात्ततोऽपि परत्वेन सार्थक्यात्। ननु "महतः परमव्यक्तमव्यक्तात्पुरुषः परः, पुरुषान्नपरं किञ्चित् सा काष्ठा सा परा गतिः"इति श्रुत्या "इन्द्रियाणि पराण्याहु"रिति स्मृत्या च ब्रह्मणोऽन्यस्य परत्वाभावात् कथं

(१) अजसंयोग इति पं० रमानाथभट्टानां पुस्तके पाठः स चातीव प्रामाणिक इति प्रतिभाति।

तत्परत्वमिति चेत्, अत्रोच्यते--उक्तश्रुतिवाक्ये पुरुषपदं न परब्रह्मवाचकम्, किन्तु, अक्षरब्रह्मपरं स्मृतेश्च तदनुयायित्वात्तत्रापि बुद्धिपदत्वेनाक्षरं ब्रह्मैव ज्ञेयम्। नचात्र प्रमाणाभावः "द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च" इति प्रमाणसद्भावात्। तथाच द्वाविमाविति वाक्यानुरोधात् क्षरस्य परत्वासम्भवाच्चाक्षरपरमेव तत्र पुरुषपदम्। "उत्तमः पुरुषस्त्वन्यः" इति परमात्मपदेन तत्पृथक् परब्रह्मनिर्देशाच्च। अन्यच्च "ब्रह्मविदाप्नोतिपरम्" इत्यत्र ज्ञेयाक्षरब्रह्मण एव परस्य पुरुषोत्तमस्यैवाभिधानाच्च। अत्र ब्रह्मेत्यादिपदार्थचतुष्टयविवरणभूतायां "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यृचि ब्रह्मविपश्चिच्छब्दाभ्यां विवृतत्वाच्चेति सङ्क्षेपः। तथा चैतादृशं ब्रह्म वाञ्छितप्रदानेन ते मुदे प्रीतयेऽस्तु इत्याशीर्वचनम्।

इति श्रीगोस्वामिश्रीरघुनाथात्मजव्रजनाथविरचितो
ब्रह्मवादः सम्पूर्णः।

॥ श्रीकृष्णाय नमः ॥

श्रीमद्रामकृष्णभट्टविरचितः

शुद्धाद्वैतपरिष्कारः ।

शुद्धाद्वैतविचारेण मायावादनिवर्तकान् ।
श्रीमदाचार्यचरणान्प्रणमामि पुनः पुनः ॥ १ ॥

अथ शुद्धाद्वैतस्य किं लक्षणमिति चेत्, "इतरसम्बन्धाऽनवच्छिन्न-

---

श्रीकृष्णाय नमः ।

अथ शुद्धाद्वैतपरिष्कारतात्पर्यम् ।

श्रीकृष्णचरणद्वन्द्वम्प्रणम्य परमादरात् ।
शुद्धाद्वैतपरिष्कारं विवृणोमि सतां मुदे ॥ १ ॥

अथादौ श्रीमद्रामकृष्णभट्टाः प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तिसिद्ध्यर्थं मङ्गलमाचार्यवर्यचरणवन्दनरूपं निबध्नन्ति—**शुद्धाद्वैतेति** । शुद्धं च तदद्वैतं चेति कर्मधारयाच्छुद्धत्वावच्छिन्नाद्वैतत्वावच्छिन्नयोरभेद उक्तः । एतादृश शुद्धाद्वैतस्य यो विचारस्तेन मायावादनिर्वतकानाचार्यचरणान्प्रणमामीति मुख्योन्वयः । तत्र परमतनिराकरणपूर्वकस्वमतव्यवस्थापनरूपपरीक्षायाः परपक्षनिराकरणप्रधानतया **मायावादनिवर्तकानि**त्याचार्यविशेषणम् । एवं च परेषां शङ्कराचार्यादीनां ये मायावादास्तेषां निराकरणपूर्वकस्वाभिमतशुद्धाद्वैतविचारप्रस्थापनादाचार्यचरणानामतीवश्रैष्ठ्यं व्यज्यते । मायावादनिवर्तकत्वं च मायावादविशेष्यकसत्यत्वप्रकारकज्ञाननिष्ठविशेष्यताकाप्रामाण्य प्रकारकज्ञानजनकत्वम् । जनकत्वं चात्र परम्परया प्रयोजकत्वरूपम्, तेन साक्षादजनकत्वेऽपि न दोषः । **प्रणमामीति** । अत्र नमधातोः स्वावधिकोत्कर्षवत्तया ज्ञापनमर्थः, तदेकदेश उत्कर्षे प्रोपसर्गार्थप्रकर्षस्यान्वयः, एवं चाचार्यचरणविशेष्यकस्वावधिकोत्कर्षप्रकारकज्ञानजननानुकूलव्यापारवान्ग्रन्थकार इत्यर्थः । **पुनः पुनरि**ति भक्तिदार्ढ्यावबोधनाय ।

अथ शुद्धाद्वैतस्य किं लक्षणमिति । षष्ठ्यर्थो निष्ठत्वम्, तथाच शुद्धाद्वैतनिष्ठेतरव्यावृत्तोधर्मो जिज्ञासाविषय इत्यर्थः सर्वत्र किंसमभिव्याहारे जिज्ञासाविषयत्वबोधनस्यानुभविकत्वात्, जिज्ञासाविषयीभूतं लक्षणं निर्दिशति—**इतरे**त्यादिना । इतरस-

न्नकार्यकारणादिरूपद्वित्वप्रकारकज्ञानप्रतियोगिताकाऽभाववत्त्वम्" इति गृहाण । अत्र हि द्वित्वप्रकारकज्ञानप्रतियोगिताकाभाववत्त्वमित्यनेनैवेतर-सम्बन्धानवच्छिन्नत्वप्रतीतेरनवच्छिन्नान्ताविशेषणस्य किम्प्रयोजनमिति चेत्, सत्यम्, कार्यकारणादिद्वित्वप्रकारकपदार्थस्य मायिकत्वाभावाय तद्विशेषणम् । शङ्कराचार्याणां मते मायाऽविद्योपाध्यवच्छिन्नेश्वरजीवादिरूपकारणकार्ययोरशुद्धत्वात् । अन्यथा तेषां मते कार्यकारणयोः शुद्धत्वे द्वैताऽऽपत्तिः । अत एव स्वरूपलक्षणे सत्यादिपदलक्ष्यमेव ब्रह्म । "सर्वत्रैव हि वाक्यार्थो लक्ष्य एवेति च स्थितः" इत्युक्तेः ।

तत्रापि वदामः । लक्षणायाः शक्यसम्बन्धरूपत्वात्तस्य च द्विनिष्ठ-

---

म्बन्धावच्छिन्नत्वाभाववद्यत्कार्यकारणादिरूपाद्वित्वप्रकारकज्ञानं तत्प्रतियोगिताकाभाववत्त्वमित्यर्थः । अत्र च लक्षणे व्यावृत्त्यादिकं स्वयमेवाग्रे वक्ष्यत एवेति नात्र विस्तरः क्रियते ।

इतरसम्बन्धानवच्छिन्नेत्यस्यसार्थक्यमाह—**अत्र हीति** । एतल्लक्षणघटकमित्यर्थः । अनवच्छिन्नान्तानुपादाने शाङ्करमतप्रवेशापत्तिः, तन्मते मायासम्बन्धमादाय तादृशद्वित्वप्रकारकज्ञानाभावसत्वादतोऽवच्छिन्नान्तमित्याह—**सत्य**मित्यादिना । प्रकृतविषयोपयोगिशङ्कराचार्यमतं सङ्क्षेपेणाह—**शङ्कराचार्याणा**मिति । तन्मते मायोपाध्यवच्छिन्नस्येश्वरस्याविद्योपाध्यवच्छिन्नजीवतोऽभेदादित्यर्थः । अत्र चाशुद्धत्वं मायाविद्योपाध्यवच्छिन्नत्वम्, तदनवच्छिन्नत्वं च शुद्धत्वमिति निष्कर्षः । एतादृशाशुद्धत्वानङ्गीकारे तन्मते दोषं प्रदर्शयति—**अन्यथे**ति । तन्मत एतादृशाशुद्धत्वानङ्गीकार इत्यर्थः । उपाध्यवच्छिन्नत्वाङ्गीकारे तदवच्छिन्नत्वप्रयुक्तोऽभेदः स्वीकर्तुं शक्यते । तदनवच्छिन्नत्वे तु परस्परभिन्नजीवत्वेश्वरत्वरूपधर्मावच्छिन्नत्वापत्त्या शङ्कराचार्यस्य द्वैतवादित्वापत्तेः । एवं चैतादृशापत्तिवारणार्थं निरुक्तमेवाशुद्धत्वं तन्मते स्वीकरणीयम् । अत्रैवोपोद्बलकमाह—**अत एवेति** । **स्वरूपलक्षणे** ब्रह्मस्वरूपलक्षण इत्यर्थः । "सत्यं ज्ञानमनन्त"—मित्यादि ब्रह्मस्वरूपलक्षणपरवाक्यघटकसत्यादिपदैः शक्त्या न ब्रह्म बोध्यते, किन्तु लक्षणयैव, अन्यथा सत्यत्वनिष्ठप्रकारतानिरूपितविशेष्यताकबोधापत्त्या पराभिमतं धर्मसामान्याभाववद्ब्रह्म न सिद्ध्येदित्यर्थः ।

अथ शङ्कराचार्यमते सत्यमित्यादिपदलक्ष्यत्वमपि ब्रह्मणो न सम्भवतीतिप्रतिपादनायाह—**तत्रापि वदाम** इति । शङ्कराचार्यस्वीकृतलक्षणापक्षो बहुदोषदुष्ट इति ब्रूम इत्यर्थः । न च, लक्षणनिरूपणप्रस्तावे परमतखण्डनमसङ्गतमिति वाच्यम्, लक्ष्यनिश्चयं विना लक्षणायोगाल्लक्ष्यतावच्छेदकीभूतधर्माश्रयब्रह्मस्वरूपावधारणस्यात्यन्तमपेक्षितत्वादिति दिक् । **लक्षणायाः** शक्यसम्बन्धरूपायाः । **तस्य** सम्बन्धस्य । **द्विनिष्ठत्वा**च्छक्यलक्ष्योभय-

त्वाद्ब्रह्मणि सत्त्वेन वान्ताशित्वापत्तिः। अथ च सम्बन्धस्यापि मायिकत्वमिति चेत्, लक्ष्यत्वरूपधर्मवत्त्वेन दोषस्तदवस्थः। लक्ष्यत्वमपि तथैव मायिकं चेत्, भद्रं लक्षणावैयर्थ्यम्। किञ्च लक्ष्यस्य तीरस्यागङ्गात्ववत्सत्यादिलक्ष्यस्यासत्यत्वादित्वापातः। उपाधिवादस्य च श्रीमदाचार्यचरणादिभिः खण्डितत्वान्नेह तन्यते।

अथ च "सम्भवव्यभिचाराभ्यां स्याद्विशेषणमर्थवत्" इतिन्यायेन विशेषणस्येतरभेदकत्वेन मायासम्बन्धा(राहित्या)भावादेवव्यावर्त्याभावादपार्थ-

---

वृत्तित्वादुभयान्तर्गतब्रह्मवृत्तित्वमपिप्राप्तमिति। **वान्ताशित्वापत्तिः**। वान्तस्य परित्यक्तस्य सधर्मकत्वस्य लक्षणापक्षेऽपि पुनः स्वीकारापत्तिरित्यत्यन्तं जघन्यो दोषः परपक्षे स्थित इत्यर्थः। अयं भावः—तत्पदशक्यतावच्छेदकधर्मवत्वस्य शक्ये नियमात्सत्पदशक्यत्वे ब्रह्मणोऽपि सत्यत्वावच्छिन्नत्वापत्या तत्परिहारार्थं लक्षणापक्षः स्वीकृतः शङ्कराचार्यैः परं गौरवग्रस्तलक्षणापक्षेऽपि न तद्दोषनिरासः सम्भवति, लक्षणायाः सम्बन्धरूपत्वेन द्वित्वावच्छिन्नाधिकरणताकत्वाद्ब्रह्मणोऽपि तादृशसम्बन्धवत्वापत्त्या न निर्धर्मकत्वं सिद्धमिति भक्षितेऽपि लशुने न शान्तोव्याधिरित्यादिकं बहुतरमूहनीयम्।

ननु भवतु शक्यसम्बन्धरूपत्व लक्षणायास्तथापि न दोषः, मायिकसम्बन्धस्य ब्रह्मणि स्वीकारात्, एवं च तस्यावास्तविकत्वान्न सधर्मकत्वं ब्रह्मण इत्याशङ्कते—**अथ च सम्बन्धस्ये**ति। अत्रोत्तरमाह—**लक्ष्यत्वे**ति। एवं च लक्ष्यत्वनिष्ठप्रकारतानिरूपित प्रमीयविशेष्यतावत्वाद्ब्रह्मणः सधर्मकत्वापत्तिस्तदवस्थेति भावः। पुनः शङ्कते—**लक्ष्यत्वमपी**ति एवं च मायिकलक्ष्यत्वरूपधर्मवत्वान्न ब्रह्मणः सधर्मकत्वापित्तिरित्यर्थः। अत्राप्युत्तरमाह—**भद्र**मिति। अयमभिप्रायः किम्मायिकत्वम्? सत्यत्वमसत्यत्वं वा? आद्ये लक्ष्यत्वरूपसत्यधर्मावच्छिन्नत्वापत्त्या नाधर्मकत्वम्। द्वितीये वदतोव्याघातः। ब्रह्मणो लक्ष्यत्वमस्ति नास्तीति चेति। दूषणान्तरमप्याह—**किञ्चे**ति। **लक्ष्यस्येत्यादि**। लक्ष्यताविशिष्टस्य हि शक्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकभेदवद्धर्मावच्छिन्नत्वनियमेन ब्रह्मणोऽपि सत्यत्वप्रतियोगिकभेदवदसत्यत्वरूपधर्मावच्छिन्नत्वापत्तिः। तथा च सुतरां व्याघात इत्यर्थः। एवमभ्युपगमवादेन मतखण्डनं सम्पाद्येदानीमुपाधिवादे दोषमुद्भावयति—**उपाधिवादस्ये**ति। श्रीमदाचार्यचरणैस्तथा तदन्वयजैः श्रीव्रजनाथचरणैश्च सुबहुलं विचारितत्वान्नात्र विचारः क्रियत इत्यर्थः।

स्वमतेऽनवच्छिन्नान्तदलसार्थक्यप्रदर्शनार्थमाह—**अथचे**ति। अय भावः—लक्षण हि लक्ष्यतावच्छेदकावच्छिन्नविशेष्यकलक्ष्यप्रतियोगिकभेदवत्प्रतियोगिकभेदत्वावच्छिन्नविधेयताकानुमितिजनकत्वाद्धेतुस्वरूपं भवति, तद्घटकानां च पदानां हेतुघटकत्वेन व्यभिचारवारकतयैव सार्थक्यमिति। एवं च स्वमते ब्रह्मणि मायासम्बन्धाप्रसिद्ध्या तद-

मिदं विशेषणमिति चेत्, न, दत्तोत्तरत्वात्। बोधाय निरूपणीयत्वेनेतरमतजन्यज्ञानस्य निरसनीयत्वात्।

किञ्च सन्ध्याधिकरणानुरोधेन स्वाप्निकसृष्टेर्मायिकत्वेन तद्व्यावृत्यर्थं वा तत्। स्वाप्नसृष्टेरवास्तविकत्वेनास्याः सृष्टेश्च वास्तविकत्वेन भेदो "वैधर्म्याच्च न स्वप्नादिवदि"तिसूत्रादिभिर्व्यासचरणैरेव प्रतिपादितः। सम्बन्ध इतरत्वविशेषणं तु ब्रह्मणो धर्मधर्मिभावसम्बन्धावच्छिन्नतया तस्यापि निरासे शङ्करमतप्रवेशवारणाय। तर्हि धर्मधर्मिभावसम्बन्धाङ्गीकारे द्वित्वप्रकारकज्ञानप्रतियोगिताकाभावाभावादव्याप्तेरिति चेत्, धर्मधर्मिभावस्या-

---

नवच्छिन्नत्वविशेषणमनर्थकमिति शङ्कातात्पर्यम्। अत्रोत्तरमाह—**दत्तोत्तरत्वा**दिति। पूर्वमित्यादिः, तथाच "कार्यकारणादिद्वित्वप्रकारकपदार्थस्य मायिकत्वाभावाये"त्यादिपूर्वग्रन्थ एवैतद्दल प्रयोजनमुक्तमित्यर्थः। एतदेवाह—**बोधाये**ति। तथाच पराभिमतनिरासार्थमेव तद्विशेषणमिति सिद्धम्।

स्वमतेऽपि स्वप्नसृष्टेर्मायिकत्वस्य प्रसिद्धत्वेन तदनुसृत्यापि प्रथमदलसार्थक्यमाह—**किञ्चे**ति। **सन्ध्याधिकरणानुरोधे**नेति। तृतीयाध्याये द्वितीयपादे प्रथमाधिकरण इत्यर्थः। तत्र हि "मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्" इति सूत्रे मायामात्रं स्वप्नप्रपञ्च इत्युक्तत्वात्। स्वाप्नसृष्टेः सद्भिन्नत्वं सूत्रान्तरेणापि प्रदर्शयति— "**वैधर्म्याच्च न स्वप्नादिवदि**"ति। द्वितीयाध्याये द्वितीयपादे एतत्सूत्रम्। तत्रच स्वप्नसृष्टेःवैधर्म्यसिद्धिरिति स्वप्नसृष्टेः सद्भिन्नत्वं सूत्रकारसम्मतमित्यवश्यमेव स्वीकर्तव्यम्। इतरसम्बन्धानवच्छिन्नेत्यत्रेतरपदसार्थक्यमाह—**सम्बन्ध** इति। तथाच शङ्करमते ब्रह्मणः सम्बन्धमात्रानवच्छिन्नत्वात्तन्मतनिराकरणायेतरपदमितिभावः।

स्वमते धर्मधर्मिभावसम्बन्धस्य स्वीकारात्सम्बन्धस्य च द्वित्वावच्छिन्नसम्बन्धिताकत्वात् कथं द्वित्वनिष्ठप्रकारताकज्ञानाभाववत्त्वमित्याशङ्कते—**तर्ही**ति। **अव्याप्ते**रिति। नन्वसम्भव इति कस्मान्नोच्यते? लक्ष्यस्यैकत्वावच्छिन्नत्वात्तद्वृत्तित्वे लक्ष्यतावच्छेदकव्यापकाभावप्रतियोगितावच्छेदकावच्छिन्नत्वरूपासम्भवस्यैव वक्तुं योग्यत्वादिति चेत्, सत्यम्, तदभिप्रायेणैवाव्याप्त्यभिधानात्। दोषमुद्धरति—**धर्मधर्मी**ति। तथा च धर्मधर्मिणोरभेदेऽस्य द्वित्वनिष्ठप्रकारताकज्ञानाभाववत्त्वमुपपन्नमित्यर्थः। नन्वेवमभेदाङ्गीकारे धर्मधर्मिभावस्य सम्बन्धत्वानुपपत्तिः, सम्बन्धत्वस्य द्वित्वावच्छिन्ननिरूपकतानिरूपितनिरूप्यत्ववद्वृत्तिताकत्वव्याप्यत्वनियमादिति चेत्, न, सम्बन्धस्याभेदरूपस्य स्वीकृतत्वात्। तथाचेतरेषां संयोगसमवायादीनां द्विनिष्ठत्वेऽपि तद्विलक्षणत्वादस्य सम्बन्धस्यैकनिष्ठत्वेन न किञ्चिदनुपपन्नमिति हृदयम्। नन्वेवमभेदे धर्मधर्मिभावः कथमित्याशङ्कायाम्, तद्विवेक-

भिन्नत्वस्य "प्रकाशाश्रयवद्वा तेजस्त्वात्" इत्यादिसूत्रैर्निर्णीतत्वात् । "परास्य शक्तिः" इत्यादिष्वभेद एव षष्ठ्यङ्गीकारात् ।

एतेन भेदाभेदवादिनौ निम्बार्कभास्कराचार्यौ प्रत्युक्तौ । तत्राद्यस्य वास्तविकभेदाभेदत्वेन मध्वाचार्यस्यैव भेदस्य वास्तविकतया द्विप्रकारके-त्यादिना निरस्तत्वात् । द्वितीयस्य तु—औपाधिकभेदाभेदेन भेदस्यौपाधिक-त्वेनेतरसम्बन्धेनेत्यादिना व्यावर्तितत्वात् । तर्हि अवच्छिन्नान्तमेव तदिति चेत्, शङ्करमतापत्तिः; अतः कार्यादीति ।

तर्हि रामानुजाचार्यमतेऽपि मायासम्बन्धाभाववत्कार्यकारणयोरद्वैत-तया तन्मतप्रवेश इति चेत्, शृणु, तन्मते हि चिदचिद्विशिष्टस्य सूक्ष्मस्य स्थूलस्य कारणस्य कार्यस्य च सत्वेन स्वमते "आत्मैवेदमग्रआसीदि"-त्यादिश्रुत्याऽचितः कारणावस्थायां निषेधात् केवलात्मनः कारणतया, ततो

रणाय सूत्रमुपन्यस्यति—**प्रकाशेति** । तृतीयाध्यायद्वितीयपादे नवमाधिकरणस्थमादिमं सूत्रमिदम् । अस्यायमर्थः—यथा प्रकाशाश्रयाः सूर्यादयः प्रकाशादभिन्नाः पृथक्स्थि-त्यभावात्तथैव ब्रह्मधर्माणामपि ब्रह्माभिन्नत्वेऽपि ब्रह्मधर्मत्वमुपपद्यत एवेति । प्रमाणान्तर-मप्याह—**परास्यशक्तिरित्यादीति** ।

एवं सङ्क्षेपेण शङ्कराचार्यमतं खण्डयित्वाऽधुना निम्बार्कभास्कराचार्यमतप्रवेशानापत्तिं दर्शयत्येतेनेति । वक्ष्यमाण दोषेणेत्यर्थः । अत्रेदं तात्पर्यम्—मध्वमते भेद एव वास्त-विकः, निम्बार्कमते भेदाभेदावुभयावपि वास्तवाविति तन्मते द्वित्वप्रकारकज्ञानस्यैव सत्वेन द्वित्वप्रकारकज्ञानप्रतियोगिताकाभावाभावाच्च तन्मतप्रवेशापत्तिरिति । भास्कराचार्यमत-निराकरणं दर्शयति—**द्वितीयेति** । व्यावर्तितत्वादित्यग्रिमेणान्वितम् । तन्मते भेदाभेद-स्यौपाधिकत्वेनेतरसम्बन्धानवच्छिन्नत्वाभावान्नातिव्याप्तिरिति भावः । पदव्यावृत्तिपरि-शोधनार्थं पुनः शङ्कते—**तर्हि अवच्छिन्नान्तमेवेति** । एवं च कार्यकारणरूपेत्यादि-पदवैयर्थ्यमित्यर्थः । अत्रोत्तरमाह—**शङ्करेति** । शङ्करमतप्रवेशापत्तिरित्यर्थः । एतादृ-शापत्तिवारणार्थमेवोक्तपदसार्थक्यान्नवैयर्थ्यमित्याह—**अतः कार्यादीतीति** ।

रामानुजमतप्रवेशापत्तिमाशङ्कते—**तर्हीति** । उत्तरमाह—**शृण्विति** । उत्तरं शृण्वि-त्यर्थः । रामानुजमतस्यातीवविलक्षणत्वेन तन्मतप्रवेशापत्तिर्न शङ्कास्पदापीति सूचयितुं स्वमताद्रामानुजमतभेदं स्पष्टयति—**तन्मते हीति** । "आत्मैवेदमग्र आसीदि"तिश्रुति-प्रतिपादितं चिद्विशिष्टस्याकारणत्वं परेषामसम्मतम्, तथैव कार्यावस्थायां तैर्भेदः स्वीक्रियते । अस्माभिश्चाभेदः "नेहनानास्ति किञ्चने"तिश्रुतिप्रमाणको निर्धार्यत इत्याह—**चिदचिदि-**

वैलक्षण्यम्, कार्यावस्थायामपि तेषां मते परस्परभेदस्य वास्तविकत्वेन स्वमते अभेदस्य वास्तविकत्वेनापि वैलक्षण्यम्। न च घटपटादीनामभेदो न सम्भवतीति वाच्यम्, सर्वेषां ब्रह्मोपादानस्यैकत्वेन तस्यैवावस्थान्तरत्वेन चाभेदात्। यथा सुप्त उत्थित उपविष्टे च पुरुषेऽवस्थाभेदेऽपि न पुरुषभेदः।

किञ्च इतरसम्बन्धानवच्छिन्नत्वेनाचितो वास्तविकभिन्नाचितश्च निरासेन न तत्रातिव्याप्तिः।

किञ्च विशिष्टाद्वैतमित्यस्य विशेषणविशिष्टत्वेन विशेषणस्य चेतरव्यावर्तकत्वेन सम्भवोऽपेक्षितोऽत्र व्यावर्त्याभावतया वैशिष्ट्यकथनं

स्यादिवैलक्षण्यमित्यन्तेन। युक्तश्चैतत्कथमन्यथा "यदेवेह तदमुत्रयदमुत्र तदन्विह" "मृत्योः स मृत्युं गच्छति य इह नानेव पश्यती"त्यादि श्रुतिवाक्यसङ्गतिः?

स्वमतेऽभेदं स्पष्टयितुमाशङ्कते—**नचे**ति। वाच्यमित्यन्वयः। अयमभिप्रायः—घटो न पटः, पटो न घटः, द्रव्यं न गुणः, गुणो न द्रव्यमित्यादिप्रतीतिसिद्धः परस्परं घटादीनां भेदो नञस्तदर्थकत्वात्। नचात्र नञो न भेदार्थकत्वम्, किन्त्वत्यन्ताभावपरत्वमेवेति न दोष इति वाच्यम्, नञोऽत्यन्ताभावाबोधकत्वात्। न च भूतले न घट इत्यादिप्रत्यये भूतलनिष्ठाभावप्रतियोगित्वादिबोधानुरोधादत्यन्ताभाव एव नञोऽर्थ इति वाच्यम्, सप्तमीसमभिव्याहाराद्धितत्रात्यन्ताभावबोधकत्वम्, यत्र तु प्रतियोग्यनुयोगिवाचकपदयोः समानविभक्तिकत्वम्, तत्र भेदबोधकत्वमेव। समानविभक्तिकप्रतियोग्यनुयोगिवाचकपदसमभिव्याहृतनञो भेदबोधकत्वनियमात्। तथाच घटो न पट इत्यत्राप्यव्यवहितपूर्वत्वसम्बन्धेन प्रथमाविशिष्टघटपटपदसमभिव्याहृतनञो भेदबोधकत्वस्याऽऽनुभविकत्वेन कथमभेदः शक्यते वक्तुमित्याशङ्कातात्पर्यम्।

अत्रोत्तरमाह—**सर्वेषामि**ति। तथाच प्रतीतितो भेदसिद्धावपि कारणैक्यादस्यैक्यमित्यर्थः। **ब्रह्मोपादानस्ये**ति। ब्रह्माभिन्नोपादानकारणस्येत्यर्थः। **एकत्वेन**, अभिन्नत्वेन। **अभेदात्**, कार्यस्याप्यभेद एवेति न कुत्रापि भेदसिद्धिरित्यभिप्रायः। ननु तथापि कपालं न घटः, घटो न कपालमित्यादिप्रतीत्या कार्यकारणयोर्भेदस्वीकारात्कथं ब्रह्मकारणकस्यापि जगतो ब्रह्माभिन्नत्वम्, कथं च तदनुरोधेनैक्यमिति चेत्, न, कार्यस्य कारणाभिन्नत्वात्। तथाच यथा कटककुण्डलाद्यनेकमपि कार्यजातं कारणभूतसुवर्णादाभिन्नं तथैव जगतोऽपि ब्रह्माभिन्नत्वं तदनुरोधेन चैक्यं सिद्ध्यत्येवेत्यलं पल्लवितेन।

विशिष्टाद्वैतमते दोषान्तरमुद्भावयति—**किञ्चे**ति। **इतरव्यावर्तकत्वेन सम्भव** इति। इतरव्यावर्तकत्वमित्यर्थः। तथा चेतरनिष्ठाभावप्रतियोगित्वसम्पादकानामेव विशे-

बोपपद्यत इति । एतेन शैवोऽपि दत्तोत्तरः ।

भिक्षुस्त्वविभागाद्वैतवादमवलम्ब्यौपाधिककर्तृत्वादिकमङ्गीचकार, तद्-पीतरसम्बन्धानवच्छिन्नाभावत्वेन निरस्तम् । द्वित्वप्रकारकाद्यभावत्वान्तेन मध्वाचार्यमतस्य निरासः । लीलास्थभावस्य बाधाभावाय कार्यकारणादि-रूपमिति ज्ञानस्य विशेषणम् । द्वित्वप्रकारकप्रतियोगिताकाभावस्य मायावादमतेऽपीष्टत्वात्, तन्निवारणाय ज्ञानस्येति प्रतियोगिनि विशे-षणमिति सुष्ठु ।

अत्र शुद्धाद्वैतपदे कोऽसौ समास इति चेत्, शुद्धञ्च तदद्वैतञ्चेति कर्मधारयः । अत्रेतरसम्बन्धानवच्छिन्नत्वे सतीत्येवं योज्यम् । उक्त लक्षणं तु शुद्धयोः कार्यकारणयोरिति षष्ठीतत्पुरुषपक्षे बोध्यम् ।

अत्र नरसिंहतापिन्यां योनित्वं ब्रह्मणः समर्थयित्वा "सर्वं सर्वमयं सर्वे जीवाः सर्वमयाः सर्वावस्थासु तथाप्यल्पा" इत्याद्युक्त्वा "सन्मात्रो नित्यः शुद्धो बद्धः सत्यो मुक्तो निरञ्जनो विभुरद्वय आनन्दः परः प्रत्यगेकरसः प्रमाणैरेतैरवगम्यते" इति वाक्यं पठितम् । अग्रे च "सर्व-मत एव शुद्धोऽबाध्यस्वरूपः सुखरूप आत्मे"ति निरूपितम् । "सर्वं

षणानां सार्थक्यमिति पूर्वोक्तोर्थः पर्यवसितः । **एतेने**ति । उक्तदोषादेवेत्यर्थः । **शैवो-ऽपी**ति । रामानुजमततस्करत्वादित्यर्थः । तदुक्तं गिरिधरचरणैः—"शैवोप्येतेन विध्वस्तो यतस्तस्कर एवही"ति शुद्धाद्वैतमार्तण्डे । अपिना कापालिकादिपरिग्रहः । **दत्तोत्तरः** खण्डि-तमत इत्यर्थः ।

भिक्षुमतं खण्डयितुमुपन्यस्यति—**भिक्षुस्त्वि**ति । विज्ञानभिक्षुरित्यर्थः । पूर्वोक्तमेव पदसार्थक्यं प्रकारान्तरेण द्रढयति—**तदपी**त्यादिग्रन्थेन । एतस्यार्थः प्रागेवप्रपञ्चितोऽस्मा-भिरिति नात्र विस्तरः क्रियते । ज्ञानपदसार्थक्यमाह—**द्वित्वे**ति । तथाच मायावादप्रवे-शापत्तिवारणार्थमेव ज्ञानपदमिति भावः ।

शुद्धाद्वैतपदसमासं व्याकुरुते—**अत्रे**ति । **कोऽसौ समास** इति । किन्नामधेयक इत्य-र्थः । लक्षणं तु न कर्मधारयमभिप्रेत्य, किन्तु षष्ठीतत्पुरुषमाभिप्रेत्यैवेत्याह—**उक्तलक्षणं** त्विति ।

एतावता प्रबन्धेन शुद्धाद्वैतलक्षणं प्रतिपाद्येदानीमस्य सर्वोत्कृष्टत्वप्रदर्शनार्थं तत्रैव स-

खल्विदं ब्रह्म''त्यादि श्रुतिषु शुद्धाद्वैतं स्पष्टमेव प्रतीयत इति बोध्यम् । विस्तरस्तु मत्कृतशुद्धाद्वैतमार्तण्डप्रकाशे बोध्यः ।

श्रीमद्गिरिधराधीशपादाम्बुजपरागभृत् ।
व्यलिखद्रामकृष्णोऽसौ शुद्धाद्वैतपरिष्कृतिम् ॥

इति श्रीरामकृष्णभट्टविरचिता शुद्धाद्वैतपरिष्कृतिः समाप्ता ।

चासां श्रुतीनां पर्यवसायित्वं दर्शयति—अत्रेति । **शुद्धाद्वैतं स्पष्टमेव प्रतीयत इति ।** तथाच प्रमाणशिरोमणिश्रुतिप्रतिपादितत्वाच्छुद्धाद्वैतमतस्य सर्वोत्कृष्टत्वमिति तात्पर्यम् ।

शुद्धाद्वैतपरिष्कारतात्पर्यमुपवार्णितम् ।
रघुनाथेन गोपालपदयोरर्पितं मुदा ॥

इति श्रीम'त्कोकजे'इत्युपाह्व-तर्कतीर्थ-रघुनाथशास्त्रिविरचितं शुद्धाद्वैतपरिष्कारतात्पर्यं समाप्तिमफाणीत् ।

श्रीकृष्णाय नमः ।

गोस्वामी श्रीहरिरायमहाप्रभु विरचित

ब्रह्मवाद

गोस्वामी श्रीहरिरायमहाप्रभु अन्य मतावलम्बियों का सन्देह दूर करते हुए शुद्धाद्वैतपदवाच्य स्वमत सिद्धान्त का निज जनों को बोध कराने के लिये सयुक्तिक विचार आरम्भ करते हैं—

"अब यह विचार किया जाता है, कि भक्तिमार्ग में कारण रूप जो माहात्म्य ज्ञान है, उसको उत्पन्न करने वाला और भक्ति-प्रेम की दृढ़ता में अनुकूल जो ब्रह्मवाद कहा गया है वह ब्रह्मवाद क्या है ?"

उपर्युक्त वाक्य में भक्तिमार्ग, कारण, माहात्म्यज्ञान और अनुकूल आदि शब्दों का प्रयोग है, अतः इन शब्दों का निरुक्ति भी आवश्यक है। पण्डितवर गोपालकृष्ण भट्टजी ने इन शब्दों पर अच्छा प्रकाश डाला है। सब से प्रथम "भक्ति मार्ग" इस शब्द पर विचार किया गया है।

"भक्ति" मार्ग क्यों है ?

श्रीहरिरायजी ने "भक्तिमार्ग" का कारण माहात्म्य ज्ञान के बताया है। अब सब से पहिले यह विचार करना चाहिये भक्ति को मार्ग क्यों कहा ? मार्ग शब्द का यौगिक अर्थ है जिसके द्वारा (श्रवणादि नवधा भक्ति के द्वारा) श्रीपूर्णपुरुषोत्तम को ढूंढा जाय *वह मार्ग। अर्थात् श्रवणादि साधनानुष्ठानात्मिका भक्ति, मार्ग है।

पुष्टिमार्ग में साधन तथा साध्य को अभिन्न माना गया है और यहाँ श्रवणादि को साधन कहा है, अतः पुष्टि मार्ग की उपपत्ति (सिद्धि) नहीं होगी ऐसी शङ्का नहीं करना चाहिये, क्योंकि साधन और साध्य पुष्टि मार्ग में एक ही है, श्रवणादि भी भक्ति है और उससे प्राप्त होने वाली फलात्मिका "परा भक्ति" भी भक्ति ही है, अत एव दोनों अभिन्न हैं। भक्ति-प्रेम श्रवणादि साधन और परा फलात्मिका भक्ति उभयत्र अनुस्यूत है। इसका विवरण आगे चल कर किया जायगा। यहां हमको भक्ति किस पदार्थ का नाम है यह जान लेना उचित मालूम होता है। जिस प्रकार "भक्ति मार्ग" शब्द का प्रयोग

---

*मृग्यते पुरुषोत्तमोऽनेनेति मार्गः।

किया जाता है, उसी प्रकार "भक्तिरस" शब्द का भी प्रयोग लोक में प्रसिद्ध है।

भक्ति का रसत्व

"स्थायी भाव को रस कहते हैं(१)" इत्यादि वाक्यों में स्थायी भाव को रस कहा है। देवादि विषया रति को भाव कहते हैं। अर्थात् विभावानुभावव्यभिचारिसात्विकादि भावों से अनुनीयमान माहात्म्य-ज्ञान पूर्वक स्नेह रसरूपी होने के कारण भक्ति भी रस है। स्नेह यदि माहात्म्य ज्ञान पूर्वक हो तो उसको ही भक्तिरस कह सकते हैं, न कि लौकिक स्नेह को। नारदपञ्चरात्र में कहा है कि "माहात्म्य-ज्ञान पूर्वक सुदृढ और सर्वतः अधिक जो स्नेह है, वही भक्ति है, उसी (भक्ति) से मुक्ति प्राप्त होती है भक्ति के विना मुक्ति नहीं मिलती(२)"

"जो ईश्वर में अनुरक्ति है वह परा भक्ति है(३)" ऐसा शाण्डिल्य महर्षि ने भक्ति सूत्रों में कहा है। परा भक्ति का अर्थ "फल की आकाङ्क्षा के विना जो ईश्वर में प्रेम होता है वह परा भक्ति है(४)" ऐसा होता है। भक्ति रस अन्य रसों का उपलक्षक (Designation) है। रसों में शृङ्गार रस प्रधान होने से वही अभीष्ट है; क्योंकि शृङ्गार रस के अन्तर्गत ही अन्य रस हैं। यदि ऐसा न होता तो "रस को प्राप्त करके आनन्द युक्त होता है (५)" इत्यादि श्रुति वाक्यों में रसप्राप्ति का फल आनन्द के कहा है; भयानकादि रसों का फल आनन्द नहीं है, यदि उनको शृङ्गार रस के अन्तर्गत न माना जाय तो उनको रस ही नहीं कह सकेंगे, अतः यह मानना चाहिये कि शृङ्गार रस में ही अन्य रसों का अन्तर्भाव हो जाता है। "वह रस रूप है (६)" "वह सर्व रस है" इत्यादि श्रुति वाक्यों से ज्ञात होता है कि शृङ्गाररसरूप पुरुषोत्तमविषयकज्ञान पूर्वक, स्नेह विषयक यह मार्ग है। यह मार्ग है न कि सरणि। जैसे राज मार्ग से गमनादि सौकर्य और चोरादि का भय नहीं होता है वैसेही भक्ति मार्ग में अत्यन्त आयास (प्रयत्न) साध्य शमदमादि साधन

---

(१) स्थायीभावो रसः स्मृतः। रतिर्देवादिविषया भाव इत्यभिधीयते। श्रुतत्वाल्लोकसिद्धत्वादनुभूतेश्च भेदतः। तेभ्योऽतिरिक्तो मन्तव्यः साङ्गो भक्तिरसो बुधैः॥ इत्यादि वाक्यों में भक्तिरस का वर्णन किया गया है, जिनको विशेष जिज्ञासा हो उनको "भक्ति रसत्व वाद" पढना चाहिये।

(२) माहात्म्यज्ञानपूर्वस्तु सुदृढ सर्वतोऽधिकः। स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्नचान्यथा॥

(३) सा परानुरक्तिरीश्वरे। (४) फलाभिसन्धिरहिता परा।

(५) रसं ह्येवाय लब्ध्वाऽऽनन्दी भवति। (६) रसो वै सः। सर्वरसः।

अप्रयोजक है । इसीलिये यह भक्तिमार्ग अनायाससाध्य कहा जाता है । अर्थात् इस मार्ग से गमन करने वालों को शमादि की कठोर परीक्षा से मुक्त समझा जाता है । श्रीमद्भागवत में कहा है कि हे (१)माधव तुम्हारे साथ जिनका सुहृद्भाव है, ऐसे भक्त, मार्ग से गिरते नहीं है, तुम्हारे द्वारा रक्षित होकर निर्भय रूप से विचरते हैं। एकादश स्कन्ध में कहा है कि जिस(२) मार्ग से गमन करते हुए कभी प्रमाद (धोखा) नहीं होता है, आँखे मूँद कर तथा दौड़ते हुए गमन करने पर भी न कहीं फिसलने का भय है न गिरने का। इसी कारण श्रीमदाचार्यचरण भी तत्वदीपनिबन्ध के भक्ति प्रकरण में कहते हैं कि-(३)यदि भक्तसे किसी समय इस भक्ति मार्ग में रहते हुए(४)वेदनिन्दा हो जाय अथवा अधर्म हो जाय तो वह नरक में नहीं गिरता है, किन्तु हीन योनि में उत्पन्न होता है । भक्तिमार्ग में प्रथम से लेकर अवधि पर्यन्त दुःख से असम्भिन्न (रहित) सुख ही है यह सिद्धान्त हुआ।

भक्ति शब्द का यौगिक अर्थ ।

"भज् सेवायाम्" इस धातु से "क्तिन्" प्रत्यय करने पर "भक्ति" ऐसा शब्द सिद्ध होता है। यहां प्रकृति भज् है और क्तिन् प्रत्यय है, वह क्रियासामान्य अर्थ को कहता है । वैयाकरणों का नियम है कि प्रकृति और प्रत्यय दोनों मिलकर एक ही अर्थ को कहते हैं। यहां धात्वर्थ से सूचित प्रधानभूता क्रिया है, उसका प्रत्यय में पर्यवसान होगा, तब जो प्रधानभूता क्रिया मानसी सेवा है, वही "भक्ति" शब्द का अर्थ होगा। "मेरा(५) मन अन्यत्र होने से मैंने सुना नहीं, अन्यत्र मन होने से मैंने देखा नहीं" इत्यादि वाजसनेय श्रुति के वाक्यों से ज्ञात

(१) तथा न ते माधव तावकाः क्वचिद्भ्रश्यन्ति भक्तास्त्वयिबद्धसौहृदाः। त्वयाभिगुप्ता विचरान्ति निर्भया विनायकानीकपमूर्धसु प्रभो ॥

(२) यानास्थाय नरो राजन् न प्रमाद्येत कर्हिचित्। धावन्निमील्य वा नेत्रे न स्खलेन्न पतेदिह ॥

(३) अत्रापि वेदनिन्दायामधर्मकरणात्तथा। नरके न भवेत्पातः किन्तु हीनेषु जायते।

(४) भगवद्भक्त वेदकी निन्दा वा अधर्म करही नहीं सकता, यदि कदाचित् प्रसङ्ग वश ऐसा हो जाय, तो उसको हीन योनि में जन्म लेना पडता है। यह दण्ड भी कुछ कम नहीं है, क्योंकि हीन योनि में उसको भगवत्प्रेम से वञ्चित रखनेवाली सामग्री प्रचुर प्रमाण में प्राप्त होती है। जो लोग भक्त नहीं हैं पर भक्तहोने का आडम्बर कर अधर्म करते हैं वे अवश्य ही नरक में वास करेंगे। यही आचार्य चरणों का आशय समझना चाहिये।

(५) अन्यत्रमना अभूवं नाश्रौषम्, अन्यत्रमना अभूवम् नापश्यम्।

